


PK
531
A15
1899
v.1
pt.7

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 974.



PK
531
A15
1899
V.1
pt.7

महाभाष्यप्रदीपोद्योतः।

MAHĀBHĀṢYAPRADĪPODDYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PANDIT BAHUVALLABHA ÇĀSTRĪ.

VOL. I, FASCICULUS VII.

LIBRARY
MAR 19 1959
UNIVERSITY OF TORONTO

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1900.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs.	1	8
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4-8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-2		0	12
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each		2	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-2 @ 2/ each ...		4	0
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1		0	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-14 @ /6/ each ...		4	2
Ditto Lāṭyāyāna, (Text) Fasc. 1-9 @ /6/ each		3	6
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /6/ each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1		0	6
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1-4		1	8
Kātantra, (Text) Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-7 @ /6/ each		2	10
Manutīkā Saṅgraha, (Text) Fasc. 1-4 @ /6/ each		1	8
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1-3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1-4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /6/ each ...		5	4

दौर्बल्यादिति । (कै)

परिभाषात्वभङ्गकृतन्तदिति भावः ॥

सन्दिग्धेति । (कै)

आपाततः सन्देहः । पर्य्यालोचने त्वनुपस्थितिरेवेति भावः ॥ तदाह

अपवादत्वमेवेत्यादि । (कै)

ङित्त्वसामर्थ्यकृतं हि तत्त्वमिति भावः ॥ ननु ङित्त्वं सर्वादेशत्व-द्वारा गुणबाधनार्थं वोताऽन्यत्र कृत्स्नसर्वादेशत्वबाधफलकं वेति शङ्कते भाष्ये

प्रयोजनं नामेति ॥ (भा)

सति सर्वादेशत्वे इति । (कै)

अन्त्याऽऽदेशत्वे तु तत्सम्पादनेनैवाऽवयवे ङित्त्वस्य चारितार्थ्येन समुदायोपकारकत्वे मानाभावात् प्रत्ययस्य ङित्त्वाऽभावेन न गुणादिप्रतिषेधप्राप्तिरित्यर्थः ॥

ङित्त्वादिति । (कै)

गुणवृद्धिप्रतिषेधार्थत्वे सिद्धे सर्वादेशत्वं तस्मिंश्च तत्त्वमिति अन्योऽन्याश्रयेण सर्वादेशत्वाऽलाभेऽन्यस्यैव स्यादिति भावः ॥

अन्तरेणाऽपीति । (कै)

तथा च तत्सामर्थ्यात् सर्वादेशत्वद्वारा गुणवृद्धिबाधनार्थत्व-मेवाऽस्येति भावः ॥

अनेकाल् शित्सर्वस्य। १। १। ५५॥

ननु शित्यदाभावे कथं "[1]शित्करणादेव" इति भाष्यमत आह

सतीति। (कै)

अकारोच्चारणसामर्थ्याद् भूतपूर्वाऽनेकाल्त्वमादाय शास्त्रप्रवृत्तिरिति भावः। यत्त्वेतत्सामर्थ्यात् फलप्रत्यासत्तेश्च विधानोत्तरमेवेत्संज्ञादिशास्त्रप्रवृत्तिर्लभ्येति "इति भाव" इति। तन्न। "[2]अणुदित्" सूत्रे इशि सवर्णग्रहणापत्तिपरभाष्येण सूत्रे एवेत्संज्ञालोपप्रवृत्तेः सूचनात्॥ नन्वेवं अकारादित्येव वक्तुं युक्तं किमित्यदेनेति चेत्। न। फलान्तराभावेऽपि अकारोच्चारणस्य स प्रयोजनत्वाल्लोप एवेत्कार्यमिति अस्येत्वं प्रवर्त्तत इतिसूचयितुं तथोक्तेः। तदाह

अनेकाल्त्वेति॥ (कै)

भाष्ये

ननु चाचापीति। (भा)

अपवादविप्रतिषेधादिति भावः॥

अस्त्यन्यदिति। (भा)

एवं च तस्य स प्रयोजनत्वेन भूतपूर्वगत्याऽऽश्रयणे मानाभावेन नाऽनेकाल्त्वात् सर्वादेशत्वमपि तु शित्त्वादेवेति शिद्ग्रहणं सूत्रे

---

१ शित्करणादेवात्र सर्वादेशो भविष्यति। भा॥

२ अ १। पा १। सू ६९॥

कार्य्यमिति भावः ॥ सर्वादेशात्प्राक् प्रत्ययादित्वाभावेन नेत्त्वमिति प्रतिपादयितुमन्त्यस्याऽयमित्यादिभाष्यं तदाक्षिपति

नन्विति । (कै)

ततश्च सर्वादेशत्वं विनापि प्रत्ययादित्वाल्लभ्यत एवेत्त्वमिति भावः ॥

षष्ठीमिति । (कै)

सर्वनाममस्वन्विनो जसः शी । नपुंसकाद्विहितयोर्जश्शसोः शिरितिचार्थः । एवं च परशब्देन परस्य विधानाभावान्न तत्प्रवृत्तिरिति भावः ॥ तयोः परशब्दयोगे पंचमीलेऽप्याह

अथवेति । (कै)

अस्त्यपि सूत्रे शिद्ग्रहण इत्यर्थः । शस्यादयो यावन्नादेशास्तावन्नेत्त्वलोपौ । आदेशाश्च परत्वात् सर्वस्येवेति भावः ॥

नानुबन्धकृतमिति । (भा)

एवं च शीप्रभृतीनामपि शित्त्वादेव सर्वादेशत्वं तस्याप्यनुबन्धत्वात् । न च विधानकाले उक्तरीत्या तस्य तत्त्वज्ञानाभावः । तद्योग्यतयैव तत्त्वात् । अन्यथा कप्रत्ययादीनां कादेर्वाक्यार्थबोधोत्तरं प्रत्ययत्वज्ञान इत्संज्ञालोपाविति विधानकाले कस्यानुबन्धत्वज्ञानाभावेन "नानुबन्धकृतमसारूप्यम्" इत्यस्याऽप्राप्तौ विकल्यापत्तेः । शिदित्यस्यापीत्संज्ञायोग्यशकारवान् सर्वस्येत्यर्थ इति न दोष इति भाति ॥

अस्त्येषा परिभाषेति । (भा)

अनुबन्धानामलुप्तव्यवहाराभावस्य ज्ञापनादिति भावः । अत एव

---

१ परिभाषेन्दु-८ ॥

"अनुबन्धकार्य्येऽनल्विधौ" इति स्थानिवत्त्वनिषेधो न। अन्यथा क्रो ल्यपः कित्त्वं न स्यात्। न च पूर्वमनुबन्धलोपे तद्रहितस्यैव [1]स्थानिवत्त्वात्तस्य न स्थान्यवयवत्वम्। सूत्रे [2]स्थानिषष्ठ्या निर्दिष्टस्यैव स्थानिपदवाच्यतया तदवयवत्वस्य ककारे सत्त्वात्। अन्यथाऽग्रहीदित्यादौ "[3]इट ईटि" इति दीर्घो न स्यादिति स्थानिवत्सूत्रे निरूपयिष्यामः॥ भाष्ये

तचाऽसरूपेति। (भा)

असरूपे कविषयेऽण्प्राप्तिर्दोषः। सर्वादेशे "[4]दिव औत्" इति सर्वादेशः स्यादिति दोषः॥

प्रतिषेधे। (भा)

दैपो भेदेन निर्देशः कार्य्यः॥ तृतीये हेतुः "अनाकारान्तत्वादिति" इत्यर्थः॥ ज्ञापकमनावश्यकमित्याह

अनेकान्तेष्विति॥ (कै)

एकान्तेषु चेति। (कै)

अयमेव मुख्यः पक्ष इति "[5]तस्य लोप" इत्यत्र भाष्ये स्पष्टम्॥

इति कालोपनामशिवभट्टसुतसतीगर्भजनागोजिभट्टविरचिते महाभाष्यप्रदीपोद्द्योते प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकम्॥

---

१ स्थानित्वात्। क। ग। ङ॥ २ स्थानषष्ठ्या। क। ख। ग। ङ॥
३ अ ८। पा २। सू २८॥ ४ अ ७। पा १। सू ८४॥
५ अ १। पा ३। सू ९॥

महाभाष्यप्रदीपोद्योतः ॥

स्थानिवदादेशोऽनल्विधौ । १ । १ । ५६ ॥

स्थानिरूपमिति । (कै)

न च सिद्धं धर्मिणमित्यादिन्यायेन पूर्वोच्चारितस्योद्देश्यत्व-बोधकेन स्थान्यादेशरूपं प्रतिपद्यत इत्येवार्थो युक्त इति वाच्यम् । प्रसिद्धस्थानिनां प्रसिद्धादेशविधाने वैयर्थ्यापत्तेः । अन्यत्र विधाने तु "[1]स्थानेऽन्तरतम" इति सूत्रोक्तन्यायेनाव्यवस्थापत्तेस्तस्य न्यायस्य सूत्रकृताऽप्यत्र त्यागाच्च । अत एव भाष्यकृता "स्थानी संज्ञा" इत्येवोक्तं नत्वादेशः संज्ञेतीति बोध्यम् ॥

[2]वा लिटीति । (पा)

न च "[3]चक्षिङः ख्याञ्" इत्यनेनाऽनेन च सर्वत्रार्द्धधातुके ख्याञो विकल्पे सिद्धे लिट्येव वेति नियमार्थं स्यादिति वाच्यम् । दोषदुष्टनियमापेक्षया एतत्सूत्रे एतदतिरिक्तार्थकत्वज्ञापकताया एवौचित्यात् ॥ भाष्ये

स्थानी आदेशस्येति । (भा)

"[4]न वेति" इत्यत इति शब्दाऽनुवृत्तेः स्थानिशब्दार्था हनादय

---

१ अ १ । पा १ । सू ५० ॥ २ अ २ । पा ४ । सू ५५ ॥
३ अ २ । पा ४ । सू ५४ ॥ ४ अ १ । पा १ । सू ४४ ॥

आदेशपदार्थस्य बधादेः संज्ञेत्यर्थः। स्थानिशब्दस्यादेशशब्दसंज्ञात्वे वैयर्थ्यमितिभावः॥ ननु स्वरितलिङ्ककाऽनुवृत्तिरूपाधिकारस्य संज्ञाविषयस्य शास्त्रेऽभावादाह

प्रस्ताव इति। (कै)

प्रस्तावः प्रकरणम्। बुद्धिसन्निधिरितियावत्। पूर्वोत्तरत्र प्रायेण संज्ञाया दर्शनादितिभावः। परिभाषात्वं त्वनुक्तिसम्भवग्रस्तमिति तन्नोक्तम्॥ भाष्ये

बधेरेवेति। (भा)

नचैवमाङो बधयम इत्येवाकारविवक्षणेन स्वतन्त्रबधिव्यावृत्तौ हन् ग्रहणं व्यर्थं स्यादितिवाच्यम्। "आजघ्न" इत्यादि सकलहन्त्यादेशसंग्रहार्थं तस्य सत्त्वात्॥

हन्तेर्नस्यादिति। (भा)

आहनिष्यत इत्यादौ॥ नन्वत्र पादे वतिं विनाऽतिदेशानवगतौ कथं "[1]बहुगणे"त्यत्रातिदेशपक्ष उक्तोऽत आह

बह्विति॥ (कै)

संख्येतीति। (कै)

संख्यापदस्येत्यर्थः॥

लौकिकार्थग्रहणादिति। (कै)

संख्यानकरणरूपेत्यर्थः। एवं च तदाधापत्त्या संज्ञात्वाऽसम्भवादतिदेश इति भावः। इदं च तत्रैव सूत्रे कैयटे स्पष्टम्॥

---

१ अ १। पा १। सू २३॥

संज्ञा नेति। (कै)

उभयगतेरिहशास्त्रे सत्त्वेन संज्ञात्वेऽपि ङिदादिग्रहणेन चङादीनामपि ग्रहणम्॥

न ह्रीति। (कै)

अनुवृत्तकिद्ग्रहणस्य संज्ञापरत्वेन सैव प्रतिषेधा न च सा क्ङो विहितेत्यर्थः। किं च। किदित्यादेः संज्ञात्वे "[1]क्ङिति च" इत्यत्रास्य ग्रहणं न स्यात् संज्ञास्वरूपानुच्चारणादितिबोध्यम्। तथा निष्ठा ग्रौङित्यादिनिषेधोऽप्यसम्बद्धः स्यात्। कित्सादृचर्य्याद् ङिदित्यप्यतिदेशः॥

कार्य्यातिदेशोऽयमिति। (कै)

एवंचाऽनपेक्षितशास्त्रमनपेक्षितनिमित्तं च प्रत्ययत्वादिरूपं कार्य्यमनेनैव क्रियत इति भावः॥ भाष्ये

यः स्थाने इति। (भा)

स्थानशब्दप्रयोगात् तदनुवृत्त्यादेशोलभ्यत इति भ्रमं व्युदस्यति

स्थानीति॥ (कै)

नन्वादेशलब्धौ "क" इति प्रश्नानुपपत्तिरिति [2]तत आह

द्विविध इति॥ (कै)

केचित्तु स्थानिशब्दस्य सम्बन्धिशब्दत्वमजानतः प्रश्नः

क इति॥ (भा)

सम्बन्धिशब्दत्वाभिप्रायमुत्तरं

यः स्थाने इति॥ (भा)

---

१ अ १। पा १। सू. ५॥ २ अत आह। क। ग। इ॥

समाधत्ते

आदेशमात्रमिति। (भा)

अस्याशयः कैयटोक्त एव। कैयटोक्तव्याख्यानेऽपि "[1]यः स्थाने" इत्यादिग्रन्थस्याशयानभिज्ञवक्तृकतयैव योज्यमानत्वादित्याशयः॥ नन्वचापि प्रत्यक्षस्यैव स्थानिवत्त्वमस्त्वित्यत आह

न चेति॥ (कै)

पदत्वेति। (कै)

अत एव देवदत्तः पचत्वित्यत्र "पदस्य" इत्यधिकृत्य विधीयमानो निघातः सिध्यति। पचतु ते ओदनमित्यत्र "पदाद्" इत्यधिकृत्य विधीयमानस्तेमयादिश्च सिध्यति॥ भाष्ये

विधिग्रहणं किमर्थमिति। (भा)

विधावित्यध्याहारात्प्राप्यते इति प्रश्नः॥ ननु समासोत्तरं सप्तम्या एव ग्रहणेन सर्वविभक्त्यन्तत्वं समासस्यानुपपन्नमत आह

अवयव इति। (कै)

पूर्वपदरूप इत्यर्थः॥ ननु विभक्तिचतुष्टयेनैव विग्रहस्यार्थप्रदर्शनेन सर्वेत्यनुपपन्नमत आह

बहुत्वेति। (कै)

द्वितीयाचतुर्थीप्रथमाभिः स्यान्यलः सूचेऽनिर्देशादिति भावः॥ ननु सकृच्छ्रुतेऽल्विधिपदे कथमल्पदस्यानेकविभक्त्यन्तेत्यत आह

---

१ यः स्थाने भवति। भा॥

तत्रेति । (कै)

विधिशब्दः कर्मसाधनः । तेनाल्समभिव्याहृतकार्य्ये इत्यर्थः ॥ प्रौढ्या पत्तान्तरमाह

अथवेति । (कै)

अल्शब्दात्परो विधिशब्दोऽल्विधिशब्दस्तेन च तदाच्योऽर्थो लक्ष्यत इति भावः । एवं च तदाच्यत्वेन रूपेण सर्वार्थाश्रयणात्सर्वविभक्त्यन्तत्वे यत्फलं तत्फलसिद्धिरिति तात्पर्य्यम् ॥

समासभावादिति । (कै)

उपदर्शितपक्षद्वयोक्तसमाससत्त्वादित्यर्थः ॥

यद्विभक्तिरिति । (कै)

षष्ठ्युपादानेऽपि स्थानसम्बन्ध एव बुध्येतेति भावः ॥

तदर्थोपक्षय एव स्यादिति । (कै)

तदर्थमात्रान्वितार्थक एव स्यादित्यर्थः ॥

दृष्ट इति । (कै)

यजेः क्तः । यद्यपि "क दृष्ट" इति रूपमुत्वेऽपि सिध्यति तथापि कविष्ट इति पक्षे स्यात् कयिष्ट इति न स्यादिति बोध्यम् ॥ "स दृष्ट" इत्यत्र "[1]एतत्तदोः" इति नित्यलोपः स्यादिति च बोध्यम् ॥ दिवि कामोऽस्य

द्युकामः । (कै)

"[2]दिव उत्" । यद्यपि वल्लं हल्त्वाद्यपेक्षया विशेषधर्मस्तथा-

---

१ अ ६ । पा १ । सू १३२ ॥ २ अ ६ । पा १ । सू १३१ ॥

ष्येतदाख्योपसृतवकारवदुकार इति वाक्योपात्तधर्मापेक्षया न तत्त्वम् । सूचककृत्प्रत्ययादेशभावमादायैव ह्येतत्कृतवाक्योपस्रव इति दिक् ॥

उपदेशादिति । (कै)

सस्य स्थानिवत्त्वेन विसर्गत्वादिसर्गस्य चाट्सूपदेशेनाट्त्वादिति भावः ॥ केवलप्रकृतेः प्रयोगाभावादाह

अचेति ॥ (कै)

विवक्ष्यते इति । (कै)

तत्समभिव्याहारे प्रतीयमानो विधेयत्वरूपोऽर्थो न विवक्ष्यत इत्यर्थोऽन्वयायोग्यत्वादितिभावः ॥

लिङ्गेति । (कै)

अत एव भूतिरित्यादिसिद्धिः । सप्तम्यर्थस्तु तत्र विवक्षित एवेति लिङ्गसंख्ये इत्येवोक्तम् ॥ भाष्ये

[1]अर्थतन्त्रा इति । (भा)

स्वार्थमात्रबोधकविभक्त्यधीना इत्यर्थः ॥

[2]प्राधान्येन । (भा)

विभक्तिं विधिरूप्य प्रकृतान्वययोग्यविभक्त्यर्थं नाश्रयन्ति ॥

---

१ अत्रा विधिरल्विधिरिति । नैतदस्ति प्रयोजनम् । प्रातिपदिकनिर्देशोऽयम् । प्रातिपदिकनिर्देशस्यार्थतन्त्रा भवन्ति ॥

२ न काञ्चित्प्राधान्येन विभक्तिमाश्रयन्ति ॥

[1]निर्दिष्टे । (भा)

बोधिते । पश्चादन्वययोग्यविभक्त्यर्थाकाङ्क्षायां यद्यद्विभक्त्यर्थमन्वयिलेनाश्रयितुं लक्ष्यानुसाराद्बुद्धिरुपजायते सा सा विभक्तिरध्याहार्य्या साधुत्वार्थमुत्पन्नविभक्तेषु लुगिति भावः । एतेन प्रत्ययाध्याहारो न क्वापि दृष्ट इत्यपास्तम् । "माभेर्मा संविक्था" इति पुरोडाशावदानमन्त्रस्थ धाना समूहे मा भैष्ट मा संविग्ध्वमित्यादौ दर्शनाच्च । तत्तद्विषयकलक्षणभेदात्तत्र सा आश्रयितव्येति तात्पर्य्यम् । नचानलितिप्रथमानिर्द्दिष्टेऽनलात्मक आदेश इत्यर्थे ल्यपोऽनलात्मकत्वेन प्रपद्येत्यादावपीट्स्यात् । उत्तमपुरुषैकवचने टेरेत्वस्य स्थानिवत्त्वाभावात् पदत्वं न स्यादितिचेन्न । [2]"अदो जग्धिः" इति सूत्रे ल्यब्ग्रहणेनादेशविशेषणत्वाभावज्ञापनादित्यदोषः ॥

स्वातन्त्र्येण । (कै)

प्राधान्येन । सकलविधिपरिग्रहार्थविधिशब्देन प्रधानन्यायो बाध्यत इति भावः ॥

एवं हीति । (कै)

कर्मण्यण पचाद्यच्चो बाधादिति भावः ॥ शब्दानित्यत्ववारणाय वार्त्तिकप्रत्याख्यानाय चाह

अप्रयोग एवेति ॥ (कै)

---

१ तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या ॥

२ अ २ । पा ४ । सू ३६ ॥

भाष्ये [१]"यत्र प्राधान्येन" इत्यस्य "विधिग्रहणाभावे"त्यादिः ॥ [२]"प्रतिषेधो न स्याद्" इत्यस्य तदर्थं विधिग्रहणमिति शेषः ॥ ननु पृथक्क्रमङ्गीकृत्यैव तत्स्थानापत्त्या तद्धर्मलाभेऽभिहिते स्थान्यादेशपृथक्त्वादिति हेतुरसंगतोऽत आह

स्थानिस्वरूपेति । (कै)

स्वं रूपमित्युक्तेर्न स्थानापत्त्या ग्रास्त्वे तत्कार्य्यलाभ इति भावः ॥

व्यभिचाराभावादिति । (कै)

तत्स्थानापत्त्या तद्धर्मलाभे दृष्टान्तोऽसंगतः स्यादिति च बोध्यम् । यद्यप्युपनीय सर्ववेदाध्यापकरूपाचार्य्यशिष्यव्यावृत्तये उपाध्यायस्येति तद्विशेषणमावश्यकम् । वेदैकदेशाध्यापको ह्युपाध्यायस्तथापि तद्व्यावृत्तौ प्रयोजनाभाव इत्यभिप्रायेणेदमिति बोध्यम् । अत्र भाष्ये "लोकत एतत्सिद्धम्" इत्युक्त्वा [३]"स्वं रूपम्" इति ग्रास्त्वादादेशे न स्यादिति सूत्रं कार्य्यम् इत्युक्तम् । तेन "स्वं रूपम्" इति ग्रास्त्वाविषये लोकन्यायेन सिद्धमिति सूचितम् । "अनल्विधौ" इति निषेधोऽपि ग्रास्त्वीयस्थानिवद्भाव एव । अतिप्रसङ्गस्तु लक्ष्यानुसारेण क्वचिल्लोकन्यायाश्रयणेन परिहरणीयः । एवं च लोलुव इत्यादावनादिष्टादचः पूर्वत्वं लोकन्यायेन भवत्येवेति केचित् ॥ [४]"अप्रदर्शितविषयः" । अप्रदर्शितप्रतिषेधः ॥ ननु

---

१ यत्र प्राधान्येनाश्रीयते तत्रैव प्रतिषेधः स्यात् ॥

२ यत्र विशेषणत्वेनाश्रीयते तत्र प्रतिषेधो न स्यात् ॥

३ अ १ । पा १ । सू ६८ ॥

४ नह्यप्रदर्शितविषयः प्रतिषेधः शक्यो विधातुमितिभावः ॥

[1]"युष्मदस्मदोरनादेशे" इत्यत्र विभक्तिविषये "सं रूपम्" इत्यस्य लोकन्यायबाधकस्याप्राप्त्या तत्र लोकन्यायेन प्राप्ततद्धर्मलाभप्रयुक्तकार्य्यनिवारणेन चरितार्थस्य अनादेशग्रहणस्य ज्ञापकत्वासंभवाद् [2]"हनो वधे"त्यादौ दोषवारणायेदं सूत्रमावश्यकमिति चेन्न । [3]"स्वादि" सूत्रे "सं रूपम्" इत्यस्य प्रवृत्त्या तत्स्वरूपाणामेव सुप्संज्ञकत्वेन तेषामेव विभक्तिसंज्ञकत्वेन तत्र तत्स्थानापत्त्या तद्धर्मलाभ इति लौकिकन्यायाप्रवृत्तेरित्याशयात् ॥

क्रियमाणेऽपीति । (कै)

मन्दमत्यनुग्रहायेत्याशयः । [4]"न पदान्त" इत्यत्र निषेधस्मर्पणाय चावश्यकं तदिति बोध्यम् ॥

अनल्विधाविति न कर्त्तव्यम् (कै)

इत्यस्य विधिपदघटितं न कर्त्तव्यमित्यर्थः ॥

असत्यपीति (भा)

भाष्ये च्छेदः । [5]"अल्विधौ प्रतिषेध" इत्यस्य चैतद्विशेषणम् । अप्राधान्येनालाश्रयणेऽपि निषेधार्थं क्रियमाणे विधिग्रहणेऽसत्यपीत्यर्थः ॥ वार्त्तिके

अविशेषणे (भा)

इति च्छेदः ॥ लक्ष्ये विशेषणाभावे इति तदर्थस्तदाह

---

१ अ ७ । पा २ । सू ८६ ॥ २ अ २ । पा ४ । सू ४२ ॥
३ अ ४ । पा १ । सू २ ॥ ४ अ १ । पा १ । सू ५८ ॥
५ आरभ्यमाणेऽप्येतस्मिन् योगे अल्विधौ प्रतिषेधेऽविशेषणेऽप्राप्तिस्तस्यादर्शनात् ॥

विशेषणे समाश्रीयमाण इति।

विधौ इति शेषः॥ "अमति" इत्यादेः प्रयोग इति शेषः॥ "सामान्यातिदेशे विशेषानतिदेशः" इति हेतुं व्याचक्षाणो वलादिलक्षं विशेषत्वं दर्शयति

तच्चेति॥ (कै)

अविवक्षितत्वादिति। (कै)

विवक्षाकारणयत्नविशेषविषयीकृतत्वाभावादित्यर्थः॥ उपात्तरूपव्यापकरूपविवक्षा हि यत्ने सत्येव भवति। अत एव [१]"सनि मी" इत्यत्र [२]"सः सि" इत्यतः "सि" इत्यनुवर्त्तितं न च तथा कश्चिद् यत्नः प्रकृते। एवं च वलाद्यादेशो वलादिवदित्येवं वाक्यकल्पनाच्च नेति भावः॥ तत्र वलादिलक्षं क्त्वाव्यापत्वं दर्शयितुमाह

तथाहीति। (कै)

आकारान्तोऽपीत्यादिदृष्टान्तार्थम्॥

यत्कार्य्यमिति। (कै)

यो धर्म इत्यर्थः। क्त्वावत्ल्यबित्येव वाक्यकल्पनेति भावः॥ "सामान्यातिदेशे" इत्यादि वार्त्तिकखण्डमवतारयति

ननुचेति (भा)

भाष्ये॥ एवमर्थशब्दं व्याचष्टे।

अन्यस्येति॥ (भा)

अशब्दार्थत्वादिति। (कै)

यद्यपि क्त्वावदित्युक्तेऽशब्दार्थप्रत्ययलादेरप्यतिदेशो भवति तथापि

---

१ अ ७। पा ४। सू ५४॥ २ अ ७। पा ४। सू ४९॥

व्याप्येन व्यापकानुमानात्तदुपस्थितिवद्व्याप्योपस्थितौ मानाभाव इति भावः ॥

यच्च त्विति । (कै)

[1]"गोतो णित्" इत्यादौ ॥ अथ सिद्धान्ती विशेषानतिदेशे दूषणं वदन् तज्ज्ञापनार्थमेव "अनल्विधौ" इत्यावश्यकमित्याह भाष्ये

यद्येवमिति । (भा)

यदि विशेषानतिदेश इत्यर्थः ॥

दीर्घं कृत इति । (कै)

दीर्घदृष्ट्या सिज्लोपस्यासिद्धत्वादिति भावः ॥ ननु दीर्घस्येट इतिसमुदायस्थानिकत्वेन तदृत्ति इट्त्वाश्रयो लोपः स्थानिवत्त्वेन स्यादेव स्थानी चादेशविधावुपात्त एवेत्यत आह

दीर्घेति ॥ (कै)

नन्वच एव स्थानित्वे ग्रहणमित्यादावपि दीर्घः स्यादत आह

इट्त्विति ॥ (कै)

भाष्ये "लोपो न प्राप्नोती"त्यस्य तस्मादनल्विधाविति वक्तव्यमिति शेषः ॥ विशेषानतिदेशे दूषणान्तरमाह

तथेति ॥ (कै)

अकितोऽपीति । (कै)

[2]"न क्ङिति" इति कित्त्वनिषेधादिति भावः ॥

---

१ अ ७। पा १। सू ९०॥ २ अ १। पा २। सू १८॥

तस्मादिति । (कै)

न च "क दृष्टः" "द्युभ्याम्"इत्यादिव्यावृत्त्या तस्य चारितार्थ्यात् कथं ज्ञापकत्वमिति वाच्यम् । अप्राधान्येनाण्यलाश्रयणे [१]"आर्द्धधातुकस्येड्" इत्यादौ निषेधप्रवृत्तये क्रियमाणं विधिग्रहणं प्रकृतार्थज्ञापकं विशेषानतिदेशे तेषामसंग्रहेण तदैयर्थ्यस्य स्पष्टत्वात्। वार्त्तिकेऽपि विधिपदघटिते प्रतिषेधेऽसत्यपीत्यर्थः॥ ज्ञापिते विशेषातिदेशे "अनल्विधौ" इत्यस्य चारितार्थ्यं दर्शयति । भाष्ये

इहापि प्रतिषेधे- (भा)

त्यादि ॥ ननु कित्त्वस्याल्विधित्वेन [२]"क्ङिति च" इति निषेधे स्थानिवत्त्वाभावात् "प्रतिदीव्ये" त्यादौ गुणः स्यादत आह

अनुबन्धेति ॥ (कै)

स्थानिनीति । (कै)

स्थान्यलाश्रये विधौ स्थानिवत्त्वनिषेधादिति भावः। [३]"न ल्यपि" इति लिङ्गमप्यत्र बोध्यम् ॥ नन्वेवमपि "अग्रहीद्" इति दीर्घस्थानिभूतादज्रूपेकाराश्रय एव सिज्लोपोऽनुबन्धस्तु उपदेश एव लुप्त इति तत्रापि स्थानिवत्त्वनिषेधः स्यादतो भाष्ये

विशिष्टं ह्येष इति । (भा)

एवं च दीर्घ इड्वदित्येवातिदेशकल्पना स्थानितावच्छेदकं च शास्त्रोपात्तरूपमेव तच्च नाल्रूपमिति "इट" इत्यादि न स्थान्यल्वृत्तिधर्माश्रयम् । एवं च यत्र शास्त्रे विशेष्यतया विशेषणतया

---

१ अ ७ । पा २ । सू ३५ ॥ २ अ १ । पा १ । सू ५ ॥
३ अ६ । पा ४ । सू ६९ ॥

वा आदेशस्थानिभूतो योऽल् [१]स्थानिसम्बन्धी वा योऽल् तन्मात्रवृत्तिधर्माश्रयणं तादृशे विधौ हि निषेधः। अत्र च शब्दतो विशिष्टमनलमाश्रयते। बलादेरित्यत्र च शब्दतो विशिष्टमलमिति भावः॥

सिद्धान्तव्यवस्थापनादिति। (कै)

इदं निरनुबन्धकानुवादेन विहितादेशविषयम्। [२]"क्त्वो ल्यप्" इत्यादौ [३]सानुबन्धानुवादेनादेशविधौ तु यथाऽनुबन्धकार्य्यस्याल्विधित्वाभावस्तथा [४]"अनेकाल् शित्" इत्यत्र निरूपितम्॥

अचापीट एव स्थानित्वमिति। (कै)

अन्यथा स्थान्यल्वृत्तीट्त्वाश्रयस्य लोपस्याल्विधित्वात्तत्र [५]स्थानिवत्त्वानापत्तिर्विशेषातिदेशेऽपीति भावः। एवं च तदुदाहरणे विशेषाऽनतिदेशेऽपि न दोषः। एतदेवाभिप्रेत्य स्वयं प्रदीप्येति-गुणापत्तिर्विशेषानतिदेशे दूषणमुक्तम्। वस्तुतो भाष्योक्तदोषोऽपि दृढ एव। तथाहि अनल्विधावित्यस्याभावे प्रायोगिकस्थानिनमादायैव वाक्योपन्यवः स्यात्। तद्बुद्धिं निवर्त्यैवादेशबुद्धिर्जायमानत्वेन तस्यैव मुख्यस्थानित्वात्॥ "यद्येवम्" इत्यस्य विशेषानतिदेशमाश्रित्य विधिग्रहणाकरणे इत्यर्थः। एवं च दीर्घस्यान्यत्परस्य कार्यं लोप इति स्थानिवद्भावेन तदप्राप्तिरितिपूर्वपक्षः। विधौ इत्युक्तौ तु न

---

१ तत्स्थानिसम्बन्धी। क। ग। इ॥ २ अ ७। पा १। सू ३७॥
३ सानुबन्धकानुवादेन। क। ख। ग। इ॥ ४ अ १। पा १। सू ५५॥
५ तत्स्थानिवत्त्वानापत्तिः। क। ख। ग। इ॥

दोषः। ग्रास्त्रस्योपस्थित्या ग्रास्त्रोपात्तस्यान्यादेशभावस्य निमित्तस्य च ग्रहणमिति न दीर्घोऽल्विधिरित्युत्तरम्। तदेतदेषोऽनलम् इत्यनेन दीर्घादिविधिरित्यर्थकेन ध्वनितमिति बोध्यम्॥ अत एव [१]"भो भगो अघो" इति सूत्रे भाष्ये रेफस्थानिकविसर्गस्य स्थान्यल्-वृत्तिधर्मत्वाश्रयं कार्यं नाल्विधित्वादित्युक्तम्॥ भाष्ये

यदि तर्हि सामान्यमिति। (भा)

"अनल्विधौ" इति ज्ञापकात् तज्ज्ञापनार्थं [२]वाऽनल्विधाविति यदि क्रियते इत्यर्थः॥ आश्रयशब्दस्य भावसाधनत्वे वलादित्वे इति तद्विवरणमसङ्गतं स्यादत आह

आश्रीयत इति॥ (कै)

स्थानिकार्य्यमिति।

सार्वधातुकत्वाभावादिति भावः॥ भाष्ये

प्रतिषेधस्त्विति। (भा)

आदेशः स्थानिवद् अलाश्रयविधौ तु नेति सूत्रार्थ इति भावः॥ समाधत्ते

नवेति॥ (भा)

सप्रयोजनम् (कै)

प्रयोजको यस्य वलादित्वस्येत्यर्थः। करणे ल्युट्। पदसंस्कार-पक्षाऽऽश्रयेण तु अतिदेशः प्रयोजनमिति प्रयुक्तम्॥ ग्रङ्कितोऽऽह

---

१ अ ८। पा ३। सू १७॥ २ चानल्विधाविति। क। ग॥

नैतद्विवदामह इति ॥ (भा)

ननु सार्वधातुकत्वस्यालार्धधर्मत्वाभावात् कथं प्रतिषेधप्राप्तिरत आह

इडागमेति ॥ (कै)

उक्तदोषपरिहृत्यविचारान्तरारम्भोऽनुपपन्न इत्यत आह

इदानीमिति ॥ (कै)

प्रतिपादयितुमिति । (कै)

वादिमुखेनैव प्रतिपादयितुमित्यर्थः ॥

आदेशोऽस्येति । (कै)

आदेशिनीत्यत्रीत्यनेन व्यधिकरणं स्थानिसम्बन्ध्यत्राश्रय इत्यर्थः। सम्बन्धिन एवाधिकरणत्वविवक्षया सप्तमी । अत एव स्थानित्वे तु व्यपदेशिवद्भावेन तत्त्वमिति बोध्यम् ॥ सन्देहबीजं दर्शयति।

किमिति ॥ (कै)

स्थानिवद्भावादिति । (कै)

[1]"अचःपरस्मिन्" इत्यनेन। एवं चोपधात्वाभावो ञ्णित्परत्वाभावश्चेति भावः॥ अतिदेशोऽतिदिष्टं चेदर्थमङ्गतिरत आह

आदिष्ट एवेति । (कै)

सुबादीनामादेशेष्वित्यर्थः ॥ तेषु दीर्घत्वे इटि उवङि च स्थानिवत्त्वप्रतिषेधः प्राप्नोति ॥

---

१ अ १। पा १। सू ५७ ॥

तद्धितत्वमिति । (कै)

भस्य तद्धिते [१]ओर्गुणविधानादितिभावः॥ ननु पक्षद्वयेऽपि-दोषोक्तेः कस्यापि प्रश्नस्यत्वाभावाद् आतिशयिकोऽनुपपन्न इत्यत आह

न्यायेति । (कै)

[२]युक्तिरित्यर्थः। का युक्तिः प्रकृष्टेत्यच प्रश्नतात्पर्य्यमितिभावः॥

प्रत्यासत्येति । (कै)

अत एव [३]"कष्टाय" इत्यादि निर्देशाः संगच्छन्ते। एवं च प्रत्यासत्याश्रयणमेव न्याय्यमितिभावः॥ भाष्ये

विशिष्टं स्थानिकार्य्यमिति । (भा)

स्वरूपेणालभ्यमानमित्यर्थः। तदाह

यत्कार्य्यमिति ॥ (कै)

"तच्छेषः" अतिदेशशेषः॥ "तद्वारके"। अतिदेशद्वारके॥

यथेति । (कै)

एवं च यथा तत्रातिदेशप्राप्तोच्छिष्टभोजनस्यैव वर्जनं न तु स्वाश्रयगुरुत्वप्राप्तस्यैवमत्रापि अतिदेशप्राप्तात्विधेरेव वर्जनमितिभावः॥ भाव्यमानस्य सवर्णग्राहकत्वस्वीकारेऽपि तपरत्वं व्यर्थमित्याह

अकारस्येति । (कै)

अन्तरतमत्वादितिभावः। ऋकारस्थानिकावयवविकारोऽचेति

---

१ ओर्गुणः । ६ । ४ । १४६ ॥ २ युक्तौत्यर्थः । सम् ॥
३ कष्टाय क्रमणे । ३ । ४ । १४ ॥

लक्ष्यभेदान्नोदवोढ़ामितिव"लक्ष्येलक्षणस्ये"ति न्यायेनाच निर्वाह इत्याऊः ॥ [१]"क्कुन्" औणादिकः॥ बहुव्रीहौ निष्ठान्तस्य पूर्वनिपातः स्यादत आह

तृतीयेति । (कै)

आनुमानिकेऽपि स्थानिवत्त्वप्रवृत्तिर्वक्तव्येत्येतदार्त्तिकतात्पर्य्यम् ॥ लोकन्यायाऽऽश्रयेणैतत्प्रत्याचष्टे"नन्यत्वात्सिद्धम्" इति भाष्ये ॥ नन्ववयवविगमे जात्यभिव्यञ्जकाभावात् कथं श्येतिव्यवहारोऽत आह

छिन्नेऽपीति ॥ (कै)

तथाचेति । (कै)

लोपस्य विकारत्वाभावेनैकदेशविकृतोपमंख्यानेऽपि तत्रोक्तरीतिरेवावश्यकीति भावः॥ "अर्थे"त्यादि दृष्टान्तार्थम्। अन्यथा शक्तावच्छेदकानुपूर्व्यज्ञानाद्बोधो नस्यादेतदर्थं च तन्न्यायाङ्गीकार आवश्यक इति भावः ॥

अवस्थिते इति। (कै)

न च इदमङ्गे उरितिवाच्यमिति नानित्यत्वम्। अनर्थकत्वेनाऽर्थबोधाय प्रसङ्गस्य वक्तुमशक्यत्वात्। अवयवत्वेन प्रसङ्गे त्ववयवान्तरप्रादुर्भावपूर्वावयवापगमाभ्यामनित्यत्वं स्यादित्यर्थः ॥ [२]"स एवायम्"

---

१ हनो वध च (उ–सू १९४) इत्यनेन क्कुन् ॥

२ नित्याः शब्दाः। नित्येषु च नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। तच्च स एवायं विकृतश्चेत्येतन्नित्येषु नोपपद्यते ॥

दृति प्रत्यभिज्ञया भाष्ये नित्यत्वमुपलक्षितम् । अत एव विकृत दृत्यनेन विरोधः । अनित्यत्वाभावे हेतुः "तेः प्रसङ्गे" दृत्यादि । अस्य ह्यर्थवत्त्वात् "तेः प्रसङ्गे" दृत्युक्तिर्नासमञ्जसेत्यर्थः । तदुपपादकं [१]"एरुः" दृत्यादि । एवं च कार्य्यशब्दवादे न्यायेन सिद्धं नित्यशब्दवादे तु नेतिवचनारम्भवादितात्पर्य्यम् । वस्तुतो वचनारम्भेऽपि विकृतत्वबुद्धिमात्रेण तत्सङ्गतिरित्यवश्यं वाच्यम् अन्यथा विकृतस्येत्यसंगतं स्यात् । तदा तयैव रीत्या लोकन्यायप्रवृत्तिरपि सूपपादेति । अनित्यविज्ञानं त्वित्याद्येकदेशयुक्तिः ॥ [२]कात्यायनीयाद्भारद्वाजीयपाठे हेत्वभिधानं च विशेषः ॥

[३]एरुरित्यचेति । (कै)

प्रत्ययादेशत्वं चेह निषेध्यमिति भावः ॥ लोकन्यायेन सिद्धिखण्डनाय "रूपान्यत्वाच्चे" ति । तद्व्याचष्टे

यदीति । (कै)

[४]"इदमो म" दृत्यादिवदिति भावः । अर्थस्यान्यथाभावेन जात्यभिव्यञ्जकाऽभाव दृति तात्पर्य्यम् । "एकदेशविकृतेषु" दृति बहुवचनेन लोपस्यापि संग्रहाद् "अपचद्" दृत्यादावपि स्थानिवत्त्वमिति बोध्यम् ॥ भाष्ये वचनं खण्डयति

दूमेऽपीति । (भा)

---

१ अ ३ । पा ४ । सू ८६ ॥
२ भारद्वाजीयाः पठन्ति । एकदेशविकृतेषूपसंख्यानं कर्त्तव्यम् ॥
३ अ ३ । पा ४ । सू ८६ ॥
४ अ ७ । पा २ । सू १०८ ॥

आनुमानिकादेशस्याप्यादेशपदसामर्थ्येन ग्रहणादिति भावः ॥

दृदमाशयमजानानः पृच्छति ।

कथमिति ॥ (भा)

उक्तेनैवाभिप्रायेणाह

आदिश्यन्त इति ॥ (भा)

[1]इमे चेति । (भा)

तुशब्दादयः ॥ आदेशपदसामर्थ्यमजानान आह

आदेश इत्यादि ॥ (भा)

प्रत्ययादेशस्यैव ग्रहणं न्याय्यमित्यभिमानः । तदाह

योऽचेति ॥ (भा)

ननु तामादेः पदसंज्ञायामनाश्रयणेऽपि यथा स्थानिवत्त्वात् पदत्वमेवमुकारस्यापीत्यत आह

सा हीति ।

तेन नायमादेश इति भावः । तिङ्त्वं समुदायपर्य्याप्तमिति तात्पर्य्यम् । स्थानिवत्त्वद्वारापि नायमुकारः पदत्वहेतुतयाश्रीयत इति भाष्यार्थः ॥

आश्रीयते इत्यर्थ इति । (कै)

आश्रयितुमिष्यत इत्यर्थः ॥

तत्रोत्तरमाहेति । (कै)

---

१ इमे चाप्यादिश्यन्ते ॥

एकदेशीति शेषः॥ भाष्ये [१]"समुदाये"त्यादि। [२]"सुप् तिङन्त-मि"त्यादौ ति इति समुदाये निमित्तत्वेनाश्रितेऽवयवातिरिक्तसमुदायाभावात् तकारेकारान्तं पदमित्यर्थः। एवं चेकारस्योकारादेशे स्थानिवद्भावेनेकारबुद्धौ निमित्तभूतसमुदायसत्त्वात् पदत्वं सिद्धमिति भावः॥

तिङ्त्वात्। (कै)

तद्वच्छिन्नावयवत्वात्॥

तिङ्त्वम्। (कै)

तद्वच्छिन्नावयवेकारत्वमित्यर्थः। यथाश्रुते हि पचतीत्यादौ तान्तस्यापि पदत्वापत्तौ जश्त्वाऽऽपत्तिरिति बोध्यम्॥ ननु प्राधान्येनेत्युक्तौ प्रदीप इति न सिद्ध्येदत आह

यचेति॥ (कै)

प्रत्यक्षेति। (कै)

अनान्तरीयकेत्यर्थः॥ इदानीं सिद्धान्ती एकदेशयुक्तमनुमन्यमान इव पक्षान्तरत्वेन स्वाशयं प्रकाशयति भाष्ये

अथवेति॥ (भा)

सर्वविकार इति। (कै)

---

१ अभ्यन्तरश्च समुदायेऽवयवः। तद्यथा। वृक्षः प्रचलन् सहावयवैः प्रचलति॥ २ स १। पा ४। सू १४॥

[1]"अस्तेर्भूः" इत्यादौ ॥ [2]"योभूत्वा" इत्यादि भाष्यस्य प्राग्भावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं नित्यत्वमिति तात्पर्य्यम् । स्थानशब्दःप्रसङ्गवाचीत्युत्तरम् ॥

तदसंनिधाविति । (कै)

नित्यस्यावश्यकर्त्तव्यत्वादारब्धस्य चावश्यसमापनीयत्वादितिभावः ॥ संज्ञाच्छन्दस्त्वयोरभावादाह

बहुलेति । (कै)

भूतपूर्वे स्थानशब्दप्रयोगमभ्युपेत्येदं परिहारान्तरम् । अन्यथाऽनर्थक्यप्रसङ्गात् । न च तत्र स्थानशब्दो दृश्यते सोमस्थाने इत्यादावभूतपूर्वे एव प्रयोगदर्शनादिति यदि भूतपूर्वे इत्यादि भाष्यतात्पर्य्यम् ॥

न चेति । (कै)

भूतपूर्वे हि स्थानशब्दो निवृत्तिवचनः स्यादिति भावः ॥ तत्पक्षे नित्यत्वं कथमिति पृच्छति भाष्ये

कथमिति ॥ (भा)

उत्तरमाह

[3]बुद्ध्येति ॥ (भा)

---

१ अ २ । पा ४ । सू ५२ ॥ २ स्थानी हि नाम यो भूत्वा न भवति ॥

३ बुद्ध्या । तद्यथा । कश्चित् कस्मैचिदुपदिशति । प्राचीनं ग्रामादाम्रा इति । तस्य सर्वत्राम्रबुद्धिः प्रसक्ता । ततः पश्चादाह । ये क्षीरिणोऽवरोहवन्तः एथुपर्णास्ते न्यग्रोधा इति । स तत्राम्रबुद्ध्या न्यग्रोधबुद्धिं पतिपद्यते । स ततः पश्यति बुद्ध्या आम्रांश्चापक्षयमाणान् न्यग्रोधांश्चोपाधीयमानान् । नित्या एव च तस्मिन् विषय आम्रा नित्याश्च न्यग्रोधाः । बुद्धिस्त्वस्य विपरिणम्यते ॥

प्रतिपत्तृवशादिति। (कै)

प्रतिपत्तृशब्देन तदीया प्रतिपत्तिर्लक्ष्यते तद्वशात्प्रतिपत्तृणां तथा ज्ञानव्यवहाराभ्यां बुद्धिधर्मारोपस्तत्रानुमीयते स्वतस्तद्धर्मस्य तत्र बाधादिति भावः॥ क्वचित्तु प्रतिपत्तिवशादिति पाठः। तदाह

न त्विति। (कै)

आरोपितभूतपूर्वत्वव्यवहारान्ननित्यत्वहानिरिति भावः॥ ननु "प्राचीनम्" इत्यस्याचाधिकरणप्रतिपादकत्वात्सप्तमीस्वादत आह

प्राचीति। (कै)

सप्तम्यन्तादुत्पन्नाऽस्तातेः [१]"अञ्चेर्लुग्" इति लुक्॥ भाष्ये

तस्य सर्वचेति। (भा)

प्राग्देशवृत्तित्वावच्छिन्न इत्यर्थः। "स तत्र" न्यग्रोधेषु॥ ननु "आम्रबुद्ध्या" इति न तृतीया अर्थाऽसंगतेः। नापि षष्ठी सम्बन्धिनोऽनुपस्थितेरत आह

तस्या अनन्तरमिति। (कै)

अनन्तरपदाध्याहारेण षष्ठीति भावः। केचित्तु आम्रबुद्ध्या इत्यस्य तां विहायेत्यर्थ इत्याहुः॥ भाष्ये

अपकृष्यमाणानिति। (भा)

तत्र यथा बुद्धेरेवापकर्ष उपधानं चाऽऽम्रेषु न्यग्रोधेषु चारोप्यते तथाऽत्रापि बुद्धिगतोत्पादविनाशयोः स्थान्यादेशभावस्य च शब्देष्वारोप इति भावः॥ "आधानम्" उत्पत्तिः॥ ननु उत्सर्गापवादयोः स्थान्यादेशभावात्कथं स्थानिवत्त्वमत आह

बुद्धीति॥ (कै)

---

१ उपधानम् उपत्तिः। क। ग॥

अण्कृतेति। (कै)

ङीब् इत्यर्थः॥ भाष्ये

[1]उक्तं वा (भा)

इति वार्त्तिकस्थम् "उक्तम्" इत्यंशं व्याचष्टे

[2]विषयेण त्वित्यादि॥ (भा)

[3]अदुउणसूत्रे एकोऽकार इतिपक्षेऽनुबन्धसङ्करः प्राप्नोति केऽण्कृतं प्राप्नोति इतिपूर्वपक्षे "विषयेण तु नानालिङ्गकरणात्सिद्धमि"त्युक्तम्। विषयेऽण्कादौ भिन्नलिङ्गकरणात्। दृह मुण्डो भव दृह जटो भवेति लोकव्यवहारे यथा यङ्णको यत्रोच्यते तत्र तङ्ण एव भवति। तथा यल्लिङ्गो यत्रोच्यते तत्र तल्लिङ्गकार्यमेव नाऽन्यानुबन्धकार्यमिति तदर्थश्चोक्तः। एवं च सामान्यापेक्षत्वान्नियमस्य स्थानिवत्त्वप्रयुक्तस्याऽपि व्यावृत्तिरितिभावः। वार्त्तिकेऽधिकरणस्यैव करणत्वविवक्षया कृतौ या। कैयटोक्तव्याख्याने तु "अथवा यदयं ग्यनादीन्" इति वक्ष्यमाणपक्षे एतत्पक्षादैलक्षण्यं दुर्लभं ग्रन्थमर्यादया वार्त्तिकात्तदर्थाऽलाभश्च तु ग्रन्थस्य पुनरर्थत्वेऽपि नानापदाऽनन्वयस्तदवस्थश्च। किं च कैयटोक्तार्थकं "विषयेण तु पुनर्लिङ्गकरणात्सिद्धमि"ति भाष्ये तत्र पठितं [4]नत्वेवमिति दिक्॥ "तत्रत्यं वा" इत्यंशं व्याचष्टे

---

१ भाष्यवार्त्तिकमिदम्॥

२ विषयेण तु नानालिङ्गकरणात् सिद्धम्। ९। अ इ उण (१। १। आ २–सू १) इति ग्निवसूत्रव्याख्यानावसरे भगवता महाभाष्यकारेणेदं वार्त्तिकमुक्तम्॥ ३ अ १। पा १। आ २। सू १॥

३ न नत्वेवम्। सम्॥

(स्थानिवदादेशोऽनल्विधौ। १। १। ५६।) (अ. १। पा. १। आ. ८)

अथवा सिद्धं त्विति ॥ (भा)

अनुवर्त्तमानं षष्ठीतिपदं षष्ठीनिर्दिष्टलाक्षणिकं षष्ठ्या विपरिणम्यत इत्याशयेनाह

षष्ठीनिर्दिष्टस्येति ॥ (भा)

नन्वेवं [१]"नाभि नभम्" इत्यादौ षष्ठीनिर्देशाभावात्स्थानिवत्त्वा-

---

१ नाभि नभं च। (उगवादिभ्यो यत्। ५। १। २। एतत्सूत्रस्थगवादिगणसूत्रोऽयम्) अयं नाभिशब्दो गवादिषु पठ्यते। तत्रैवोच्यते "नाभि नभं चे"ति। तत्र चोद्यते। नाभेर्नभभावे प्रत्ययानुपपत्तिः प्रकृत्यभावात्। वा। नाभेर्नभभावे प्रत्ययस्यानुपपत्तिः। किं कारणम्। प्रकृत्यभावात्। विकृतेः प्रकृतावभिधेयायां प्रत्ययेन भवितव्यं न च नाभिसंज्ञिकाया विकृतेः प्रकृतिरस्ति। यदेव हि तन्मण्डलचक्राणां मण्डलचक्रं तन्नभ्यमित्युच्यते॥ सिद्धं तु शाखादिषु वचनाद्भस्त्वं च। वा। सिद्धमेतत्। कथम्। शाखादिषु नाभिशब्दः पठितव्यो भस्त्वं च वक्तव्यम्। नाभिरिव नभ्यमिति। कः पुनरिहोपमार्थः। यत्तदक्षधारणं परिवर्त्तनं वा। अपर आह। यत्तदक्षनोपाञ्जनमिति। न तर्हीदानीमिदं वक्तव्यं "नाभि नभं चे"ति। वक्तव्यं च। किं प्रयोजनम्। यान्येतान्यरवन्ति चक्राणि तदर्थम्। तत्र नाभिसंज्ञिकाया विकृतेः प्रकृतिरस्ति। यानि चाप्यनरवन्ति चक्राणि तदर्थमपीदं वक्तव्यम्। दृश्यते हि समुदायादवयवस्य पृथक्त्वम्। तद्यथा। वार्क्षौ शाखेति। गुणान्तरयोगाच्च विकारशब्दो दृश्यते। तद्यथा। वैभीतको यूपः। खादिरं चषालमिति। तत्रावयवात् समुदाये वृत्तिर्भविष्यति॥ अथ यो नभ्यार्थो वृत्तः कथं तत्र भवितव्यम्। नभो वृत्तः। नभ्या प्रिंप्रपेति॥ नभ्यात्तु लुग्वचनम्। वा। नभ्यात्तु लुग्वक्तव्यः। स तर्हि लुग्वक्तव्यः। न वक्तव्यः। तादर्थ्यात्ताच्छब्द्यं भविष्यति। नभ्यार्थो नभ्य इति॥

(अ. १। पा. १। आ. ८) (स्थानिवदादेशोऽनल्विधौ । १। १। ५६।)

भावेन यत्प्रत्ययसंनियुक्तनभस्य भत्वाङ्गत्वयोरभावाद् [1]"यस्येति" लोपो नस्यादत आह

नाभीति ॥ (कै)

[2]"विधानात्" । करणात् ॥ यच्च तर्हि स्यान्यनुमानं तच्च कथमत आह

विश्रवणेति ॥ (कै)

"प्रत्ययविषयम्" । [3]"ग्निवाद्यण्" विषयम् ॥

[4]वालवेति । (कै)

---

१ अ ६ । पा ४ । सू १४८ ॥

२ "नाभि नभं च" इत्यादौ षष्ठ्याः स्थाने प्रथमाया विधानादस्ति षष्ठी ॥

३ ग्निवादिभ्योऽण् । ४ । १ । ११२ ॥

४ विदूराञ्ञ्यः । ४ । ३ । ८४ । अयुक्तोऽयं निर्देशो न ह्यसौ विदूरात् प्रभवति । किं तर्हि । वालवायात् प्रभवति विदूरे संक्रियते । एवं तर्हि

वालवायो विदूरश्च

वालवायो विदूरशब्दमापद्यते व्यञ्चास्मात् प्रत्ययो वक्तव्यः ॥

प्रकृत्यन्तरमेव वा ।

अथवा प्रकृत्यन्तरं विदूरशब्दो वालवायस्य ॥ न वै तत्र वालवायं विदूर इत्युपाचरन्ति ।

न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत् ॥

तद्यथा । वणिजो वाराणसीं जित्वरीत्युपाचरन्ति । एवं वैयाकरणा वालवायं विदूर इत्युपाचरन्ति ॥

वालवायो विदूरश्च प्रकृत्यन्तरमेव वा ।

न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत् ॥

(स्थानिवदादेशोऽनल्विधौ । १ । १ । ५६ ।) (अ. १ । पा. १ आ. ८)

वैदूर्यस्य दूरान्न प्रभवः । किं तु [१]"वालवायाद्" इति [२]"विदूराद् ञ्य" इत्यस्यासङ्गतौ इदं वार्त्तिकम् । वालवायोविदूरमापद्यतेऽथास्मात्प्रत्ययः । यद्वा वालवायार्थवाचको विदूरोऽन्य एव ञ्यप्रत्ययविषय इति तदर्थः ॥ ननु [३]विश्वः शब्दादपि प्रत्ययः स्यादत आह

विश्व इति ॥ (कै)

विशेषोऽस्तीति । (कै)

नित्वं हि प्रत्ययाद्युदात्तत्ववाधेनाद्युदात्तत्वाय स्थानिवत्त्वात्नित्वेनानुदात्तत्वे तु लसार्वधातुस्थापि अदुपदेशाद् इत्यनुदात्तत्वे [४]धातोरुदात्तत्वं सिद्धमेवेति भावः ॥

आद्युदात्तार्थमिति । (कै)

इष्टमपि [५]चित्त्वप्रयुक्तान्तोदात्तत्वं बाधित्वेत्यर्थः । "अन्यत्र विकरणेभ्यः" इत्यपि नित्त्वसामर्थ्याद्वाध्यत इति भावः । किं च वावृतु इत्यस्यानेकाचो दिवादौ सत्त्वेन तत्रापि नित्त्वपित्त्वयोर्विशेषः । कैयटस्वरसस्तु तस्य धातोर्दिवादावभाव एवेति बोध्यम् ॥

इष्टसिद्धये इति । (कै)

वैयर्थ्यान्नियमत्वं वा ज्ञापकत्वं वेत्यत्र विनिगमकाभावान्नित्त्व-

---

१ वालेशटाइन मुद्रापित विवरणे कैयटे च "वालवाय" इति पकारघटितपाठ एव सर्व्वत्रास्ति ॥ २ अ ४ । पा ३ । सू ८७ ॥

३ "विश्ववणादेरसादेश्चले" इत्यधिकं क पुस्तके ॥

४ धातोः । ६ । १ । १६२ । इत्यनेन ॥ ५ चितः । ६ । १ । १६३ ॥

(अ. १। पा. १। आ. ८) (स्थानिवदादेशोऽनल्विधौ । १। १। ५६।)

सामर्थ्यादन्यत्र विकरणेभ्य इत्युपदेशबाधकल्पनापेक्षया "स्थानिवद्" इत्यतिदेशबाधकल्पनस्यैवौचित्यात्तेति भावः ॥

सामान्येनेति । (कै)

न विकरणविषयमेव नापि पित्त्वविषयमेवेत्यर्थः ॥ भाष्ये

श्यन्नादीनिति । (भा)

उत्सर्गसजातीयानुबन्धवदपवादानामुपलक्षणम् ॥

प्रत्ययानुकरणमिति । (कै)

[1]"टिड्ढाणञ्" सूत्रे माहचर्य्यादिति भावः ॥ ननु एकस्मिन् बहुवचनम् इत्युक्त्या षष्ठ्यभावात् कथमादेशत्वमत आह

एकस्मिन्निति ॥ (कै)

भाष्ये

[2]अर्थातीति । (भा)

बहुवचनशब्दो न प्रत्ययपरः किन्त्वर्थपर इति भावः ॥

ङ्याब्ग्रहणे अदीर्घ इति (भा)

भाष्ये ॥ ननु गङ्गाया ईर्गङ्गी गङ्गीयते: किपि गङ्गौरित्यादौ स्थानिवत्त्वनिषेधो न स्यात् । न च तत्र स्थानिवत्त्वे दृष्टापत्तिरस्तु सुलोप-

---

१ अ ४ । पा १ । सू १५ ॥

२ जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् (१ । २ । ५८) एतत् सूत्रस्यवार्त्तिकमिदम् । अर्थातिदेशात् सिद्धम् । वा । अर्थातिदेशोऽयम् । नेदं पारिभाषिकस्य वचनस्य ग्रहणम् । किं तर्हि । अन्वर्थग्रहणम् । उच्यते वचनम् । बहूनामर्थानां वचनं बहुवचनमिति । यावद् ब्रूयादेकोऽर्थो बहुवद्भवतीति तावदेकस्मिन् बहुवचनमिति ॥

(स्थानिवदादेशोऽनल्विधौ। १। १। ५६।) (अ. १। पा. १। आ. ८)

स्यास्त्विति वाच्यम्। आकारेकारप्रश्लेषमादायैतत्प्रत्याख्यानपरभाष्यविरोधात्। सूचमतेऽपि नाचलोपः। प्रत्यासत्त्या ङ्याप्प्रदोपस्थितदैकाराकारयोरेव दीर्घग्रहणेन ग्रहणादिति चेन्न। तेषामनभिधानात्। नचेदं विशेषणं व्यर्थम्। खट्वा इत्यादौ सवर्णदीर्घे परत्वेन परादिवद्भावप्राप्त्या स्थानिवत्त्वस्येवाभावादिति वाच्यम्। "न स्थानिवद्" इत्यस्य स्थानिकार्यं न लभते इत्यर्थे येन केनापि प्राप्तस्य स्थानिकार्यस्य निषेध इति दीर्घेऽप्याप्लुप्रयुक्तकार्याभाव शङ्कावारणार्थं तत्। हस्व इति नोक्तम्। चित्रायां जातश्चित्र इत्यादौ [1]जातार्थलुकि टापो लुक्यपि [2]"प्रत्ययलक्षणेन" [3]"हलङ्यादि" लोपापत्तेः। ममत्र। लुकोऽपि दीर्घभिन्नत्वात् तत्रापि न स्थानिप्रयुक्तकार्यातिदेश इति दिक्॥

अतिखट्व इति। (भा)

न चात्र ह्रस्व आकारस्येति तदृतमात्रमल्विधिरिति वाच्यम्। [4]"गोस्त्रियोरुपसर्जनस्य" इत्यस्य स्त्रीप्रत्ययान्तान्तप्रातिपदिकान्तस्य ह्रस्व इत्यर्थः॥ [5]"अचश्च" इति तु नोपतिष्ठते। अनियमाप्रसक्तेः। स्त्रीप्रत्ययत्वं च टाङीत्यादिविशिष्टनिष्ठमिति न दोषः। सूचोपात्तस्यैव स्थानितावच्छेदकत्वमित्युक्तम्। अत एव "गोटाङ्ग्रहणं कर्त्तव्यम्" इति वार्त्तिककृतोक्तम्। स्वरितत्ववत्त्वात् "स्त्रियाम्" इति प्रकृत्य ये विहितास्तेषां ग्रहणमिति भाष्यकृतोक्तम्। विधानं चानुबन्धविशिष्टस्यैवेति स्पष्टमेवेति दिक्॥

---

१ नञ्त्रेभ्यो बहुलम् (४। २। ३७) इत्यनेन॥
२ अ १। पा १। सू ६२॥ ३ अ ६। पा १। सू ६८॥
४ अ १। पा २। सू ४८॥ ५ अ १। पा २। सू २८॥

अतिखट्वायेति। (भा)

न चावन्तादङ्गात्परस्य याडिति तदर्थः। "उपसर्जनस्त्रीप्रत्यये च तदादिनियमात्" नैतदङ्गमावन्तमिति स्थानिवत्त्वेऽपि न याट् प्रवृत्तिरिति वाच्यम्। प्रत्ययग्रहणपरिभाषयाऽऽवन्तग्रहणे तेन चाङ्ग-विशेषणे आवन्तान्तं यदङ्गमित्यर्थान्न दोषः। अत एवार्द्धखट्वाया-मित्यादौ याट्सिद्धिरिति भावः॥ नन्वेवमपि दीर्घे कृते स्थानि-वद्भावेनाप्लं स्यादेवाऽयं निषेधस्तु न दीर्घत्वादत आह

अच चेति। (कै)

एवं च स्थानिवद्भावेन तदलाभस्तत् स्थानित्यसत्त्वादिति भावः॥ भाष्ये

ननु चेदानीमिति। (भा)

वार्त्तिकाकरणे इत्यर्थः॥

सत्यपौति। (भा)

निष्कौशाम्बिरित्यादौ॥

प्रश्लिष्टनिर्देशादिति। (भा)

अतिखट्वायेत्यादौ आकारस्य लाक्षणिकत्वादेव न दोषः। खट्वायै इत्यादौ प्रत्युत दोषो यतो लक्षणप्रवृत्तिं विना यद्रूपा-ऽसम्भवस्तदेव लाक्षणिकं परिभाषाया निषेधविषयः। नचेह तथा। एकादेशतः प्रागपि तद्रूपसत्त्वादित्याशयः॥ अयं च प्रश्लेषो [१]"याडापः" [२]"आङि चापः" [३]"औङ आपः" [४]"ङेराम्नद्याप्"

---

१ अ ७। पा ३। सू ११३॥ २ अ ७। पा ३। सू १०५॥
३ अ ७। पा १। सू १८॥ ४ अ ७। पा ३। सू ११९॥

[1]"हल्ङ्याब्" इत्येतेषु। [2]"ह्रस्वनद्यापः" इत्यत्र तु प्रश्लेषे न मानमिति दिक्॥ ननु भाष्यमते सूत्रमते च अतिखट्वस्य अः। अतिखट्वा इत्यत्र सुलोपो भवति। वार्त्तिकमते तु न। अतिखट्वे आबन्तत्वस्य विच्छेदाद्ये प्ररोहाऽसंभवादिति चेन्न। अनभिधानेनैषां प्रयोगाणामभावात्। यद्वा स्थानिवद्भावस्य कार्य्यार्थत्वेनाऽतिखट्वशब्दे आकारप्रश्लेषे फलाभावात्तदप्रवृत्तौ स्थानिन्यात्वबुद्धेरभावात् तदादेशे तदारोहः सूत्रमते भाष्यमते च दुर्लभः। परम्परया कार्य्यमादायाऽऽद्यस्थानिवत्त्वप्रवृत्तौ मानाभावात्। यत्तु वार्त्तिकमते लोपाप्राप्त्या भाष्यादिमतेऽपि ईकारादिप्रश्लेषान्तरेण लोपाभाव एव वाच्यः। एकप्रश्लेषेणैवाऽतिखट्व्यावृत्तौ सिद्धायां दीर्घग्रहणं सूत्रमते भाष्यमते तत्प्रत्याख्यानाय कृतप्रश्लेषान्तरं च नियमार्थं न कदाचिद् रूपान्तरं प्राप्नौ यौ ङापौ इति एवं च न दोष इति। तन्न। मानाभावात्। अतिखट्वाय इत्येव वार्त्तिकप्रयोजनं प्रदर्श्याऽऽकारप्रश्लेषेण हि तत्प्रत्याख्यातम्॥ भाष्ये

आहि भुवोरिति। (भा)

[3]"ब्रुव ईट्" इति [4]"अस्तिसिचोऽपृक्ते" इत्याभ्यां प्राप्तिः॥

[5]द्विसकारको निर्देश इति। (भा)

[6]"अस्तिसिचि" इति सूत्रपाठ इति भावः। प्रकारान्तरे तु

---

१ अ ६। पा १। सू ६८॥ २ अ ७। पा १। सू ५४॥
३ अ ७। पा २। सू ६३॥ ४ अ ७। पा ३। सू ८६॥
५ अस्ति सिचोऽपृक्त इति द्विसकारको निर्देशः॥
६ अ ७। पा ३। सू ८६॥

आदेशैरपहारात् सद्वयोच्चारणाभावेन निर्देश इति भाष्याशयस्य । अत एव वार्त्तिककृता मिज्लुकः स्यानिवत्त्वस्य प्रत्ययलक्षणस्य वा प्रतिषेधो नारब्धः मकारस्य मिज्विशेषणत्वमित्याशयेन । तद्विशेषणसामर्थ्यात् श्रूयमाणमान्तपरमिति "प्रत्ययलक्षण" सूत्रस्य विध्यर्थत्वेऽपि न दोषः । भाष्यकृता तु मध्यमणिन्यायेनोभयसम्बन्धमङ्गीकृत्य भुवः स्यानिवत्त्वप्रतिषेधोऽपि प्रत्याख्यात इति बोध्यम् ॥

नायं खुलिति । (भा)

यद्यपि वृद्धिर्बधस्यादन्तत्वेनापि वारयितुं शक्या तथापि तत्वांशप्रत्याख्यानायेदमावश्यकमिति भावः ॥

इड्विधिश्चेति । (भा)

यथेड्विधिः सिध्यति तथा तन्निषेधे स्यानिवत्त्वप्रतिषेधो वक्तव्य इत्यर्थः ॥ इड्विधेय इत्यस्य तन्निषेधे स्यानिवत्त्वप्रतिषेधद्वारेति शेषः ॥

आबधिषीष्टेति । (भा)

[1]"आङो यमहन" इत्यात्मने पदम् ॥

प्रतिषेधः प्राप्नोतीति । (भा)

तत्र बधेः स्यानिवत्त्वेनाङ्गतया निषेधः प्राप्त इण्निषेधरूपे कार्ये स्यानिवत्त्वप्रतिषेधेनाङ्गत्वाभावान्नेत्यर्थः । बधेरपि सूत्रे स्थान्यनुरूपानुदात्तस्यैवोच्चारणेन अनुदात्तत्वं बोध्यम् ॥

प्रकृतिस्वरस्य । (भा)

प्रकृतितः स्थान्यनुरूपतया प्राप्तस्यानुदात्तत्वस्य ॥

---

१ अ १ । पा ३ । सू २८ ॥

प्रत्ययस्वरम् । (भा)

तत्प्रयुक्तनिघातम् ॥ नन्वत्रोदाहरणे [1]"तिङुतिङः" इति निघातेन भाव्यमत आह

यदा यदिति । (कै)

यदेत्यस्य तदैतदुदाहरणमित्यनेनान्वयः। मध्ये भवति तदा इत्यपाठः ॥ भाष्ये

आर्द्धधातुकसामान्ये इति । (भा)

"आर्द्धधातुक" इति वल्लिङीत्याद्यपि विषयसप्तम्येवेति भावः। एवं चाद्युदात्तनिपातने उपदेशिवद्भावारम्भगौरवाभावेन उपदेशत्वावच्छेदेनानुदात्तत्वाभावात् स्थानिवद्भावेनाङ्गत्वे सत्यपि निषेधाप्राप्त्या तन्निषेधो न कार्य्य इति तात्पर्य्यम् ॥

आकारान्तादिति । (भा)

[2]"विभाषा लीयतेः" [3]"बिभेतेर्हेतुभये" इत्यात्वं [4]"लीलोर्नुग्लुकौ" इति [5]"भियो हेतुभये" इति च नुक्षुकौ ॥

प्रश्लिष्टनिर्देशादिति । (भा)

यद्यपि भिय इत्यत्र प्रश्लेषे एकादेशस्य [6]"क्ङिति" सूत्रभाष्योक्तरीत्या पूर्वधर्मावच्छिन्नोद्देश्यके इयङ् विधौ [7]"अचः परस्मिन्" इति स्थानिवत्त्वेनेयङ्दुर्लभस्तथापि सौत्रत्वात् स इति बोध्यम्। [8]"स्त्रियो" निष्ठायाम् इति दीर्घविधाविवेतिदिक् ॥

---

१ अ ८। पा १। सू २८॥ २ अ ६। पा १। सू ५१॥
३ अ ६। पा १। सू ५३॥ ४ अ ७। पा ३। सू ३६॥
५ अ ७। पा ३। सू ४०॥ ६ अ ३। पा १। सू ६३॥
७ अ १। पा १। सू ५७॥ ८ स्त्रियः। ६। ४। ५६॥

[1]ग्राभावेत्यादि । (भा)

[2]"ग्रा हौ" [3]"हन्तेर्जः" [4]"कृञ्चल्भ्यो हेर्धिः" [5]"उतश्च प्रत्ययाद्" [6]"घसोरेद्धौ" इत्येतैः ॥

परत्वादिति । (भा)

युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्य्याभावरूपासंभवस्य सत्त्वात् । तादृग्ग्राऽसंभव एव च विप्रतिषेधग्रास्त्रप्रवृत्त्युपयोगी स्थानिवद्भावस्तु कार्य्यप्रवृत्त्युत्तरं न प्रवृत्तिकाले इति युगपदसंभवः स्पष्ट एवेति भावः । एवमग्रेपि ॥

परत्वात्तिस्तृभाव इति । (भा)

न च [7]लिङ्गविशेषविभक्तिसंज्ञाऽपेक्षया प्रत्ययविशेषाऽपेक्षस्याऽप्यन्तरङ्गत्वात्क्षयादेशापत्तिः । किं च स्वरूपेणोपादाने विशेषापेक्षत्वकृतबहिरङ्गत्वं नेत्यर्थस्य [8]"पादः पद्" इति सूत्रस्थभाष्ये ध्वनितत्वेन सर्वथा क्षयादेशस्यान्तरङ्गत्वमिति वाच्यम् । अर्थसंज्ञाकृतबहिरङ्गत्वस्य ग्रास्त्रेऽनाश्रयणात् । एतेन चतस्र इत्यपि व्याख्यातमिति दिक् ॥ "विदुष" इत्यत्र [9]"विदेः ग्रतुर्वसुः" इति ग्रत्वादेशो वसुः ॥

---

१ लोडादेशे ग्राभावजभावधित्वहिलोपैत्त्वप्रतिषेधः । वा २५ ॥
२ अ ६ । पा ४ । सू ३५ ॥ ३ अ ६ । पा ४ । सू ३६ ॥
४ अ ६ । पा ४ । सू १०१ ॥ ५ अ ६ । पा ४ । सू १०६ ॥
६ अ ६ । पा ४ । सू ११६ ॥
७ लिङ्गविशेषविभक्तिसंज्ञाऽपेक्षतिस्रपेक्षया । क ॥
८ अ ६ । पा ४ । सू १३० ॥ ९ अ ७ । पा १ । सू ३६ ॥

[1]शतुरनुम इत्यादि। (भा)

अनुम् शता तदन्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता इत्यर्थः॥

यदि प्रत्याहारेति। (भा)

उभहितशचन्तेत्यर्थ इत्यभिमानः॥

अनुम्क इति। (भा)

वसोरपि व्यपदेशिवद्भावेनोम्त्वम्॥

आगमग्रहणे हीति। (भा)

हिरण्यर्थे। तद्ग्रहणेऽपीत्यर्थः॥ कैयटे

अनुमेव शतेति। (कै)

यद्यपि शताऽपि प्रत्याहारान्तर्गतस्तथापि सामर्थ्यात्तद्भिन्नस्यैव प्रत्याहारान्तर्गतस्य ग्रहणमिति भावः। व्यापकत्वात्प्राथम्याच्च तनादीत्युकारेण प्रत्याहार इति तात्पर्यम्॥ भाष्ये

विभाषा पूर्वत्वं प्राप्नोतीति। (भा)

अत्र वार्त्तिके भाष्ये च पूर्वशब्देन तदपवादो लक्ष्यते॥ भाष्ये [2]"सर्वचेति" "चावङ्" इति सूत्रस्याणुपलक्षणम्। ध्वनितं चेदम् [3]"अवङ्" सूत्रे भाष्ये इति षष्ठे निरूपयिष्यामः। अनन्तरेति न्यायेन तदपवादोऽपि परत्वाद्यणमपि बाधित्वा स्यादित्याशयः। यत्तु कैयटेन "तस्मादेङ्" इत्यादि "प्रसङ्ग उक्त" इत्यन्तमुक्तम्। तत्तु चिन्त्यमेव।

---

१ अ। ६। पा १। सू १७३॥ २ अ ६। पा १। सू १२२॥
३ अ ६। पा १। सू १२३॥

[1]"एङः पदान्तात्" इति सूत्रे एङ् पदोच्चारणसत्त्वेन शङ्काया असंभवदुक्तिकत्वात् भाष्योक्ते तु एङ्पदाभावादनुवृत्तिमजानतः शङ्केत्युक्तिसम्भवात् ॥ भाष्ये

एवमपीति । (भा)

लाक्षणिकत्वादस्य गोशब्दस्य स्वतः प्रकृतिभावाऽप्राप्तावपि स्थानिवत्त्वेन प्राप्नोतीति तत्प्रतिषेधो वक्तव्य इत्यर्थः । यदि तु [2]"औत्"-सूत्रभाष्योक्तरीत्या वर्णग्रहणेऽपि प्रतिपदोक्तपरिभाषा प्रवर्त्तते तदेदं वचनं न कार्य्यम् । एङो लाक्षणिकत्वात् तदंशे स्थानिवत्त्वानपेक्षणेनातिदेशविषये तदप्रवृत्तिरित्यपि नेत्याहुः ॥ भाष्ये

तपरकरणसामर्थ्यादिति । (भा)

एवं च गस्याविवक्षितत्वेनाल्विधित्वात्स्थानिवत्त्वाऽभाव इति भावः ॥

अचः परस्मिन् पूर्वविधौ ।१।१।५७॥

पूर्वेणैव सिद्धे इदं किमर्थमत आह

अल् इति ॥ (कै)

उरदत्वे इति । (कै)

अङ्गाच्छित्रप्रत्ययपरत्वनिमित्तके इति शेषः । [3]"लिच्यभ्यासस्य"

---

१ अ ६ । पा १ । सू १०९ ॥ २ अ १ । पा १ । सू १५ ॥
३ अ ६ । पा १ । सू १७ ॥

दित्युभयेषां ग्रहणाद् [1]हलादिः शेषात् प्राक् संप्रसारणे वस्य संप्रसारणात्तन्निषेधाच्च प्राङ्नित्यत्वात्परत्वाच्चोरदक्त्वमिति भावः॥

एवमचितीति। (कै)

उत्तरपदस्याधिकृतस्य ह्रस्वेन विशेषणात्तदन्तग्रहणे लब्धे ह्रस्वान्ते दित्यत्रान्तस्य ग्रहणेन भूतपूर्वगतेराश्रयणेनेदं साधयितुं शक्यमिति कश्चित्। तन्न। तदभावे ह्रस्वादावित्यर्थापत्तेः। "ह्रस्वान्ते" दित्यत्र [2]"नञ्सुभ्याम्" दित्यनुवृत्तावपि [3]"बहोर्नञ्वद्" इति वचनाद् "बह्वृचितीक" दित्युदाहृतम्। प्रत्युदाहरणादिचिन्ता वृत्तिकाराणामुचिता न तु भाष्यकृतोऽत आह

वार्त्तानीति। (कै)

वृत्त्युदाहृतानि॥ भाष्ये

शकारः। (भा)

[4]"च्छोः शूड्" इति विहितः॥

अत एवेति। (कै)

प्रत्ययनिरपेक्षतयान्तरङ्गत्वेन तुकः शादेशात् प्राक् प्रवर्त्तनादेवेत्यर्थः। अत्रान्तरङ्गत्वं प्रथमप्रवृत्तिकत्वरूपम्॥

युगपदिति। (कै)

बलाबलविचारस्य प्रतियोगिसापेक्षत्वेन तत्रैव सम्भवादिति भावः॥

---

१ अ ७। पा ४। सू ६०॥ २ अ ६। पा २। सू १७२॥
३ बहोर्नञ्वदुत्तरपदभूम्नि। ६। २। १७५॥
४ अ ६। पा ४। सू १९॥

यथेति। (कै)

कारकः किरतीत्यादौ अन्तरङ्गत्वात्पूर्वमकादेशविकरणौ इति भावः॥

सतुगिति। (कै)

[1]यद्यप्यकृतव्यूहपरिभाषया तुग्श्रुतिः कर्तुं शक्या तथापि तदभावस्यापि तुग् निर्देशो ज्ञापकः। न च वाञ्छतेः क्विपि वाञ्छावित्यादौ शाभावाय सतुक् निर्देश इति वाच्यम्। शादेश-योग्यप्रत्ययपरस्य वाञ्छतेः प्रयोगाभावात्। अत एव सतुक् निर्देश सामर्थ्यात् सर्वादेशः श इति षाष्ठभाष्योक्तं सं गच्छते॥ ननु सतुक् निर्देशेऽपि तेनाङ्गविशेषणात् तदन्तविधौ [2]"अलोऽन्यस्य" इत्यस्यैव स्यादत आह

समुदायेति॥ (कै)

अनर्थकत्वादिति। (कै)

[3]"नानर्थक" इति निषेधादिति भावः॥ सतुक्कृनिर्देशे लिङ्ग-माह

एवं चेति॥ (कै)

नहीति। (कै)

अयोगवाहेषु हलन्त्यस्यैः समावेशदर्शनेन तयोरविरोध इति भावः॥ ननु स्वाश्रयाऽनिवृत्तौ वाव्योरित्यत्र दोषोऽत आह

वाव्योरितीति॥ (कै)

---

१ अकृतव्यूहाः पाणिनीयाः। ५६। परिभाषेन्दु-॥

२ अ १। पा १। सू ५२॥

३ नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे। १०४। परिभाषेन्दुशे-॥

असिद्धत्वनिषेधादिति। (कै)

ऊठ इति शेषः। वहिरङ्गपरिभाषाऽनित्यत्वादित्यन्ये॥

योऽनादिष्टादच इति। (कै)

अज्ग्रहणं सिद्धान्तरीत्या स्थान्यपेक्षया पूर्वत्वमाश्रीयत इत्यत्र तात्पर्य्यम्॥

स्थापयिष्यमाणत्वादिति। (कै)

व्याख्यास्यमानत्वादित्यर्थः॥ अत्र स्वाश्रयकार्य्याभावाऽतिदेशस्यापि सिद्धान्तयिष्यमाणत्वाद्भाष्ये परिहारान्तरम्

अथवा योऽचेति। (भा)

अयं भावः। अभावातिदेशेऽपि स्थानिप्रयुक्तं भवत्यादेशप्रयुक्तं नेत्यर्थ इति॥ तदाह

समुदायेति। (कै)

यथा सूत्रे सानुबन्धकग्रहणे तस्यानल्विधित्वं स्थानित्वं च नास्तः तथा आदेशत्वमपि सूत्रोपात्तस्यैवेतिभावः। एवं च यण् नादेशप्रयुक्तः किन्तु तदवयवप्रयुक्त इति नासौ वार्य्यत इति तात्पर्य्यम्॥

[1]आदेशो गृह्यत इति। (कै)

आदेश इति गृह्यते इत्यर्थः॥

न प्राप्नोतीति। (कै)

स्थानिवत्त्वेनेति शेषः॥ भाष्ये

आगत्येति (भा)

मलोपस्यापि ह्रस्वस्य पित्कृत्प्रत्ययपरत्वसंपादकतया तुम्विधावाश्रयण-

---

१ आदेशो गृह्यत इति। इति नास्ति क पुस्तके॥

(अ. १। पा. १। आ. ८) (अचः परस्मिन् पूर्वविधौ । १। १। ५७।)

मित्यर्थः । अभावातिदेशे चैतत्फलम् । [१]अत एवाऽभावातिदेशे पटयतीत्यादौ वृद्धिर्नेत्यत्रे भाष्यं सङ्गच्छते ॥ ननु स्वाश्रयवल्त्वादिना यलोपसिद्धावपि आलोपः स्थानिवत्त्वेन स्यादिति तद्वारणाय परग्रहणमावश्यकमेवेत्यत आह

अव्युत्पन्नत्वादिति ॥ (कै)

आकारलोप इति । (कै)

[२]"आतो लोप" इत्यनेन । जनेरौणादिके थकि [३]"ये विभाषा" इत्यात्वे टापि तेनैकादेशे तस्य पूर्वान्तवद्भावादार्द्धधातुकत्वेन युवतिशब्देन बहुव्रीहौ निङादेशे यलोपेऽवशिष्टस्य स्थानिवत्त्वेनार्द्धधातुकादिमत्त्वात् । यातिरितिवद् इति भावः ॥ ननु आभीयत्वेनाऽऽत्वस्यासिद्धत्वाल्लोपो नेत्यत आह

न चेति ॥ (कै)

व्याश्रयत्वादिति । (कै)

ये आत्वम् आस्थानिके निङि लोप इत्यात्वनिमित्तापेक्षया न्यूननिमित्तकत्वाद् व्याश्रयता ॥ भाष्ये

द्विपदिकेति । (भा)

द्वौ द्वौ पादौ ददातीति [४]"तद्धितार्थे"ति समासे [५]"पादशतस्य" इति वुन्लोपौ ॥

---

१ "अत एव" इत्यारभ्य "संगच्छते" इत्यन्तं नास्ति क पुस्तके ॥

२ अ ६। पा ४। सू ६४ ॥ ३ अ ६। पा ४। सू ४३ ॥

४ अ २। पा १। सू ५१ ॥

५ पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च । ५। ४। १ ॥

[1]परस्मिन्नितीति। (भा)

सहविधाने परनिमित्तकत्वव्यवहाराभावादित्यर्थः॥ पुनर्लोपवचनेन यथा स्थानिवत्त्वाभावस्तथाऽभिनयति

पुनर्लोपेति॥ (भा)

भाष्ये "वैयाघ्रपद्ये" व्याघ्रस्येव पादावस्येति बहुव्रीहौ [2]"पादस्य लोप" इति लोपे [3]गर्गादित्वाद्यञि [4]"पादः पद्" इति पद्भावे [5]"न य्वाभ्याम्" इत्यैच्॥ ननु स्थानिवत्त्वादित्यनुक्तत्वेन विनापि टित एत्वात् प्राग्यीवर्णयोरित्यस्य परत्वात्प्राप्तेरत आह

इट इति। (कै)

अन्तरङ्गत्वादिति भावः॥

नित्यत्वादिति। (कै)

लोपस्तु विकरणे कृते तेन व्यवधानान्न प्राप्नोतीतिभावः। यद्यपि लुकि इलोपप्राप्तेः सोऽपि नित्यस्तथापि विकरणसंप्रधारणमात्राभिप्रायेणेदम्॥ ननु परस्मिन्नित्यस्याभावे ग्रब्लुकः स्थानिवत्त्वेन [6]"एरनेकाच" इति यण् स्यात् तत्र च कृते यलोपे स्थानिवत्त्वनिषेधेन इकारपरत्वाऽभावाद् न लोपप्राप्तिर्यलोपे लोपरूपाजादेश एव नेति नियमस्यनिमित्तभूताऽजादेशविषय एवास्तु परस्मिन् इति च न कार्य्यमत आह

---

१ परस्मिन्निति वचनाद्भवति॥ २ अ ५। पा ४। सू १३८॥
३ गर्गादिभ्यो यञ्। ४। १। १०५॥ ४ अ ६। पा ४। सू १३०॥
५ अ ७। पा ३। सू ३॥ ६ अ ६। पा ४। सू ८२॥

[1]एरनेकाच इति ।

एतेन ग्रब्लुकः स्थानिवत्त्वेन व्यवधानात् यीवर्ण्योरित्यस्य [2]न प्राप्निरित्यपास्तम् ॥

ह्रस्वादित्येवेति । (कै)

सेः स्तुतोग्रब्दादावप्येवम् ॥ यच्च स्थानिवत्त्वेऽपि न ह्रस्वान्तता तच्चाऽऽह

खट्वे इति । (कै)

लोपः सिद्ध इत्यनुषज्यते । स्थानिवत्त्वादेवेकाराकारप्रश्लेषेऽपि न दोषः ॥

नैतेभ्य इति । (कै)

एवं दीर्घैकारान्तप्रकृतिकसे इत्यादीनामेकाचरकोग्रबोधितस्य रा इत्यस्य च सम्बुद्धावभिधानाभावो बोध्यः । अत्रेदं चिन्त्यम् । ओग्रहणस्य भाष्ये कृतत्वेन दीर्घोकारान्तप्रकृतिकओकारान्तानभिधाने मानाभावः । "गोऽर्थम्" इति भाष्यं तु द्योग्रब्दस्य सर्वसंमततया ओकारान्तोपलक्षणतया व्याख्येयमेव सर्वैः । किं च संबुद्धावनभिधानेनोपपत्तौ सर्वथा विजभावकल्पना कुत इति । अपरे तु पूर्वविधावित्यस्याभावेऽयं विचारः । तच्च दीर्घान्तप्रकृतिक एकारान्ते स्थानिवत्त्वेनैङोऽभावाद् विनातिदेग्रबाधं प्रत्याहारग्रहणचारितार्थ्यस्य वक्तुमग्रक्यत्वादनभिधानकल्पने न मानम् । नचेदं भाष्यमभावातिदेग्रानङ्गीकारेणैव प्रवृत्तमिति वाच्यम् ॥ अथवा

---

१ अ ६। पा ४। सू ८२ ॥ २ अप्राप्तिः। सम् ॥

(अचः परस्मिन् पूर्वविधौ । १ । १ । ५७ ।) (अ. १ । पा. १ । आ. ८)

योऽचादेश इति (भा)

भाष्येण तदाश्रयणात् । आगत्य वैयाघ्रपद्य इत्यादेः प्रत्युदाहरणेन तदाश्रयणाच्चेत्याहुः ॥ भाष्ये

गोऽर्थमेतदिति । (भा)

अनिष्टलोपसिद्ध्यर्थमेव तत् । स्थानिवद्भावेनैङ्त्वादितिभावः ॥

बाभ्रवीया इति । (भा)

[१]मधुबभ्रोरिति यञि वृद्धौ ओर्गुणेऽवि [२]वृद्धाच्छे [३]"यस्येति" लोपे [४]"हलस्तद्धितस्य" इति सूत्राद् हल इत्यनुवर्त्तमाने [५]"आपत्यस्य" इति सूत्रेण यलोपः ॥ ननु सिद्धान्तेऽपि यनिमित्तो वान्तादेशः कथं यलोपनिमित्तं स्यादत आह

[६]संनिपातेति ॥ (कै)

भाष्ये

नैधेय इति । (भा)

निपूर्वाद्ध्राञः किप्रत्यये आतो लोपे [७]गतिसमासे [८]"ह्रचि" [९]"दृतस्त्रानिञः" इति ढक् ॥ ननु च [१०]"वेभिदिता" इत्यत्रालोपयलोपाभ्यां प्रागेव परत्वादिट् । न च तदा प्रतिषेधप्राप्तिरत आह

---

१ मधुबभ्रोर्ब्राह्मणकौशिकयोः । ४ । १ । १०६ ॥
२ अ ४ । पा २ । सू ११४ ॥ ३ अ ६ । पा ४ । सू १४८ ॥
४ अ ६ । पा ४ । सू १५० ॥ ५ अ ६ । पा ४ । सू १५१ ॥
६ संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य । ८५ । परिभाषेन्दुशे-।
७ अ ६ । पा ४ । सू ६४ ॥ ८ कुगतिप्रादयः । २ । २ । १८ ॥
९ अ ४ । पा १ । सू १२१ ॥ १० अ ४ । पा १ । सू १२२ ॥

नित्यत्वादिति। (कै)

तत इत्यनेनेटोऽनित्यत्वमुक्तम्॥ ननु कृतद्विर्वचनं नैकाजत आह

उपदेशेति॥ (कै)

ननु भिद्य भिद्य इति द्विर्वचनरूपादेशस्य न भिद्युपदेशे उपदेश इति कथमुपदेशे एकाच्त्वमत आह

द्विः प्रयोगश्चेति। (कै)

यत्तोपेऽत्रश्लिष्टस्यैव बेभिद् इत्यस्य उपदेश इति भावः॥ परे तु [1]"एकाच उपदेश" इत्यत्र [2]"एकाचो द्वे" इति सूत्रस्थभाष्यरीत्या विच्छितविशेषणाश्रयणादङ्गसंज्ञायामप्तोपस्य स्थानिवत्त्वेन त्रजादिनिरूपिताङ्गत्वस्य बेभिद् इति समुदायेऽभावाच्च पञ्चमीसमासं विनापि न तत्रानुपपत्तिरित्याहुः॥

वर्णनिर्देशे त्विति। (कै)

स्थानिन्यकारो न विवक्षित इति वर्ण एव तत्र स्थानी ठगादिप्रत्ययेष्वप्यकारस्तथैव आदेशे च विवक्षित इति ठत्वाऽभावात् प्राग्निरेव नेतिभावः॥

[3]संनिपातेति। (कै)

इदं च "ठक् छसोश्चे"ति वार्त्तिकभाष्ये स्पष्टम्॥

न भवतीति। (कै)

न च अपीपचन् इत्यत्र [4]"न पदान्ते"ति निषेधात् स्थानिवद्भावो दुर्लभ इति वाच्यम्। पदचरमावयवे कर्त्तव्ये आदेशस्य

---

१ अ ७। पा २। सू १०॥ २ अ ६। पा १। सू २॥
३ परिभाषेन्दुशे–८५॥ ४ अ १। पा १। सू ५८॥

पदान्तरस्यैव ग्रहणादत्र तदप्राप्तेः । पदेऽन्त इत्यर्थस्य भाष्ये वक्ष्यमाणत्वेनैतदर्थलाभः । केचित्तु पूर्वोत्तरमाहचर्य्येणाभ्यस्तस्य भावरूपादेशानपहृतविकरणकस्य ग्रहणादत्र प्रत्यैषिषन् इत्यादौ च न दोष इत्याहुः । वस्तुत ईदृशमाहचर्य्याश्रयणेऽपेक्षया पञ्चमीसमासाऽऽश्रयणे गौरवाभाव इति अपीपचन् इति तदुदाहरणमेव बोध्यम् ॥

न च तस्मादिति । (कै)

निमित्तत्वेनाश्रितादितिशेषः ॥ वस्तुतो निमित्तत्वेनाश्रितादित्यव्यवधानोपलक्षणम् ।

न च तस्मादिति । (कै)

ओकारेण व्यवधानादित्यर्थः । तदंशे निर्दिष्टपरिभाषाबाधे मानाभावादिदमेव युक्तम् । निमित्तत्वेनेत्यादेः शब्दमर्य्यादयाऽलाभाच्च । अत एव "तथा हि गोशब्दे"त्यादिसार्थकमन्यथोक्तार्थस्योपपादनानपेक्षत्वेन तदैयर्थ्यं निमित्तत्वेनाश्रितादित्येतद्रहितस्य युक्तत्वं चेत्यन्ये ॥ ननु विधिग्रहणे कृतेऽपि कथं स्थानिवत्त्वेन स्वाश्रयनिवृत्तिरत आह

अच इति । (कै)

"अचः परस्मिन् पूर्व" इत्येको योगः । "पूर्व"मिति लुप्त विभक्तिकं "विधौ" इति द्वितीयः । तेन स्थानिवदेवेति नियमाश्रयणमितिभावः ॥ भाष्ये

विधिमात्रे (भा)

इत्यस्य विवरणम् "अनाश्रीयमाणायामपि प्रकृतावि"ति स्थानिनीत्यर्थः ॥

वाय्वोरिति। (भा)

अत्र न बहिरङ्गाभिद्धत्वम्। उभयोर्वर्णनिमित्तत्वेन समत्वात्। पूर्वं पूर्वमन्तरङ्गमित्यपि युगपत्प्राप्तौ पूर्वमन्तरङ्गप्राप्तिनियामकं न तु जातस्याभिद्धत्वे इति भावः॥ भाष्ये स्वशब्देन स्थान्यादेशश्चोच्यते। "अपरविधाविति तु वक्तव्यमि"त्यारभ्य "कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजनानी"त्यन्ता एकदेशयुक्तिः। आयन्नायन्नित्यनयोरभिद्धवत् सूत्रेण सिद्धेः। धिन्वन्तीत्यादावुकारश्चब्दवृत्त्यार्द्धधातुकत्वस्यासिद्धधर्मत्वेन तस्य दुर्लभत्वादिटोऽप्राप्तेः। सिद्धान्तिनापि भावसाधनविधिग्रहणस्याऽप्युपादानमचेति सिद्धान्तं बोधयितुं तन्नोक्तम्॥ भाष्ये

[1]धिन्वन्तीत्यादि। (भा)

यद्यप्यङ्गात्परस्य वलादेरिडित्यर्थात्पूर्वविधावित्युक्तावपि पञ्चमीसमासेनेदं सिध्यति। तथाऽपि अङ्गसंज्ञानिमित्तस्येत्यर्थं इत्यभिप्रायेणेदमित्याहुः॥

उपलक्षणार्थत्वादिति। (कै)

इदमचित्यग्रन्थयोजनमात्रं नवयं सिद्धान्त इति बोध्यम्। अत एवादिपदं चरितार्थम्। [2]यणः प्रतिषेधो वाच्य इतिवदिदमनाश्रित्येदमितितत्त्वम्॥

पदान्ते विधातव्ये इति। (कै)

पदचरमावयवे कर्त्तव्ये इत्यर्थः॥

---

१ धिन्वन्ति क्षण्वन्ति। यणादेशे कृते वलादिलक्षण इट् प्राप्नोति। स्थानिवद्भावान्न भवति॥ २ प्रतिषेधो वाच्य-। सम्॥

ततश्चेति। (कै)

एवं च तत्सूत्राऽकरणलाघवाऽनुरोधेनापरविधावित्येव वक्तव्यमिति भावः। नित्यतुरित्यादिसिध्यये तस्यावश्यकत्वात् चिन्त्यमिदम्। भाष्ये तु सम्भवमात्रेणेदमुदाहृतम्। उरदत्त्वमपि स्थानिवद्भावेनैव सुलभं लक्ष्यविशेषे लक्ष्यानुरोधादयमपि रूपातिदेश इति वा कैयटाशयः। स्थान्यादेशयोरन्यतरापेक्षया परत्वमाश्रित्य शङ्कते

नन्विति॥ (कै)

निमित्तेति। (कै)

निमित्तं च यस्य स्थानिवत्त्वं तदीयं ग्राह्यम्। किन्विदमयुक्तम्। एतन्न्यासखण्डनायाग्रे भगवता निमित्तस्यावधिताया वक्ष्यमाणतया तदनाश्रयेणैवैतद् भाष्यप्रवृत्तेः॥ अपरविधाविति न्यासेऽपि पञ्चमीसमासस्य वक्तुं शक्यत्वेन तत्संग्रह इत्युचितम्। वार्त्तिकं तु स्वविधिसंग्रहार्थमिति स्पष्टमेव। न चाच पञ्चमीसमासे हे गौरित्यच स्वस्मात्परस्य विधावपि स्थानिवत्त्वं स्यादिति वाच्यम्। पञ्चमीसमासानित्यत्वेनादोषात्॥

प्रत्याहारग्रहणादिति। (कै)

[1]सेस्मृतो इत्यादीनामनभिधानाश्रयेणैतदुक्तम्॥ ननु बाभ्रवीया इत्यच [2]"आपत्यस्ये" तिलोपेऽवादेशस्य स्थानिवत्त्वं स्यात्। अवादेशनिमित्तयादिप्रत्ययसम्बन्धिन एव विधेः सत्त्वात्। न च [3]"न

---

१ सेः स्मृतः। ग॥ २ अ ६। पा ४। सू १५१॥
३ अ १। पा १। सू ५८॥

पदान्ते"ति निषेधः। [1]स्वरदीर्घयलोपेषु लोपाजादेशस्यैव स्थानिवत्त्वनिषेधादत आह

बाभ्रवीया इति॥ (कै)

ढको विधिरिति। (कै)

विधिशब्दो भावसाधनः। सम्बन्धसामान्यषष्ठ्या समासः॥ [2]द्वयोरेकस्येत्यादिनिर्देशात् स्वविधौ स्थानिवत्त्वमनित्यमिति बाभ्रवीयनैधेययोर्न दोष इति परे॥ भाष्ये [3]"ऽये"त्यादिना"संगृहीतमि"त्यन्तेन काक्षा प्रश्नः। तदेवाह

व्यवधानात् प्रश्न इति॥ (कै)

साक्षादिति। (कै)

एवं च उत्तरस्येत्यस्यानुपस्थाने तदङ्गं निर्दिष्टग्रहणमपि नोपतिष्ठत इति भावः॥

तस्मिन्निति। (कै)

[4]"तस्माद्" इति सूत्रे [5]"तस्मिन्" इत्यतोऽनुवर्त्तमानस्य निर्दिष्टस्येत्यर्थः। [6]वरेण्याच्च लिङ्गाच्च सूत्रे तदनुपस्थितिर्बोध्या॥

---

१ प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् (न पदान्तद्विर्वचन – – १। १। ५८। एतत् सूत्रस्य वार्त्तिकम्)॥

२ द्वयोरेकस्य डतरच्। देयमृणे। किरतौ लवणे। इत्यादिज्ञापकमत्र॥

३ अथ निमित्तेऽभिसम्बध्यमाने यत्तदस्य योगस्य मूर्द्धाभिषिक्तमुदाहरणं तदपि संगृहीतं भवति। किं पुनस्तत्। पट्वी गच्छेति॥

४ अ १। पा १। सू ६७॥ ५ अ १। पा १। सू ६६॥

६ स्वरग्रहणाच्च। क। ग॥

[1]सम्बन्धसामान्ये इति। (कै)

न तु कर्मणीत्यर्थः। तेन सर्वलक्ष्यसिद्धिरिति भावः॥ भाष्ये

पूर्वः स्यादिति। (भा)

पूर्वो न स्यादित्यस्याप्युपलक्षणम्। तदाह

स्वाश्रयनिवारणार्थमिति। (कै)

एवं च प्रकृतसूत्रे उभयोरपि ग्रहणं बोध्यम्॥ कैयटे

---

१ अयं विधिशब्दोऽस्त्येव कर्मसाधनो विधीयते विधिरिति। अस्ति भावसाधनः। विधानं विधिरिति। तच्च कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिदं संगृहीतमिति ज्ञात्वा भावसाधनस्य विधिशब्दस्योपादानं विज्ञास्यते। पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वः स्यादिति स्थानिवद्भवतीत्येवमाट् भविष्यतीट् च न भविष्यति। दध्यत्र। मध्वत्र। चक्रतुः। चक्रुः। इति परिहारं वक्ष्यति। कानि पुनरस्य योगस्य प्रयोजनानि।

स्तोष्याम्यहं पादिकमौदवाहिं
ततः श्वोभूते प्रातनीं पातनीं च।
नेतारावागच्छतं धारणिं रावणिं च
ततः पश्चात् खंस्यते ध्वंस्यते च॥

स्तोष्यामीति। कथयिष्यामीत्यर्थः॥ पादिकमिति। पादोऽस्यास्तीति ठन्। दीर्घत्वादिषु वार्थेषु ठक्। चरत्यर्थे तु पदिक इत्येव भवति पर्पादित्वात्। "पद्भावे इके चरतावुपसंख्यानम्" (पद्यत्यतदर्थे। ६। ३। ५३। एतत् सूत्रस्य वार्त्तिकम्) इति पद्भावः॥ उदकं वहतीत्यण्। संज्ञायामुदभावः। अपत्ये इञ्॥ श्वोभूतिर्नाम शिष्यः। तस्याऽऽमन्त्रणम्॥ प्रातनपातनशब्दाभ्यां गौरादित्वाद् ङीष्॥ नेतारविति। शिष्ययोरामन्त्रणम्। नयेते गुरुमुखात् शास्त्रार्थमिति नेतारौ॥ धारणरावणशब्दाभ्यामिञ्॥

भावसाधन एवेति। (कै)

एव शब्दोऽप्यर्थ इति केचित्। "न पदान्त" इति सूत्रे एतत्-स्फुटं वक्ष्यते॥ भाष्ये

परिहारं वक्ष्यतीति। (भा)

दध्यत्रेत्यत्र यणः प्रतिषेधारम्भं चक्रतुरित्यादौ [१]"द्विर्वचने-ऽची"ति॥

चरत्यर्थे इति। (कै)

[२]"पद्भावे दृके चरतौ" इत्युपसंख्यानादितिभावः॥

[३]गौरादित्वादिति। (कै)

शब्देर्ण्यन्ताद्युजितिभावः। टित्वान्ङीबिति सन्नमे आकरः। शातनीमित्यादा"वल्लोपो न" इत्यल्लोपप्राप्तिः। धारणिमित्यादौ धृरुभ्यां ण्यन्ताभ्यां ल्युटि णित्वस्यासिद्धत्वात् [४]"नस्तद्धित" इत्यस्य प्राप्तिः॥ भाष्ये

[५]यजादिभ्यो विहित इति। (भा)

एवं च वच्यादिभ्यो ण्यन्तेभ्यः क्विपि संप्रसारणं न भवत्येव। क्विबभाव एवेत्यन्ये॥

नित्यादपीति। (कै)

[६]"नाजानन्नर्थे" इति निषेधस्तु अनित्यो नास्त्येव वेति भाष्या-

---

१ अ १। पा १। सू ५६॥

२ पद्यत्यतदर्थे। ६। ३। ५३। एतत् सूत्रस्थवार्त्तिकम्॥

३ षिद्भौरादिभ्यश्च। ४। १। ४१॥

४ अ ६। पा ४। सू १४४॥ ५ अ ६। पा १। सू १५॥

६ नाजानन्नर्थे बहिष्टृप्रकृतिः। ५१ परिभाषेन्दुशे-॥

श्रयः । पूर्वनिमित्तकार्य्यत्वम् अचान्तरङ्गत्वं विवक्षितम् ॥ उदाहरणत्ववादी आह । भाष्ये

[1]अनेनाऽपीति ॥ (भा)

सति स्थानिवत्त्वे इति । (कै)

एवं च द्वयोरपि नित्यत्वेनोच्चारणक्रमे प्राथम्यात् पूर्वं पूर्वयणादेश एवेति भावः ॥ [2]"इतरः" । उदाहरणत्वखण्डनवादी ॥

शब्दपरेति । (कै)

उच्चारणक्रमीयप्राथम्यस्य शास्त्रेण बाध इति भावः । तत्सूत्रे व्यक्तिन्यायेन सूत्रपाठतः शब्दतश्चोभयविधमपि परत्वं गृह्यत इति तात्पर्य्यम् ॥ नन्वेवं कार्य्यम्परमित्युच्यते तत्कथमभेदे स्यादत आह

एकमपीति । (कै)

व्यक्तिपक्षे प्रतिलक्ष्यं लक्षणभेदादिति भावः ॥ विषयगतं पौर्वापर्य्यं तदवच्छिन्ने लक्षणे आरोप्यत इत्यत्र तात्पर्य्यम् । विप्रतिषेधशास्त्रप्रवृत्तियोग्यं "नचास्ति यौगपद्येनेति" भाष्यबोधितं विरोधमुपपादयति ।

एकस्य चेति । (कै)

प्रसङ्गे आदेशविधानादादेशसमये स्थानिनोऽसत्त्वं निमित्तत्वं

---

१ अनेनाऽपि सिद्धः स्वरः । कथम् ।

आरभ्यमाणे नित्योऽसौ परश्चाऽसौ व्यवस्थया ।
युगपत् सम्भवो नास्ति बहिरङ्गेण सिध्यति ॥

२ कैयटे । इतर आह ॥

च सत्त्वे सत्त्वाऽसत्त्वे चैकत्र युगपद् विरुद्धे। एवं च द्वयोर्यणोर्योग-पद्याऽसम्भव इति भावः॥ भाष्ये

बहिरङ्गेण सिद्धतीति। (भा)

तेनैव कर्त्र्येति सिध्यति न सूत्रेणेत्यर्थः। एवं च ग्रब्दतः परत्व-मादाय विप्रतिषेधसूत्रस्य नैव प्रवृत्तिरिति तात्पर्य्यम्। उदाहरण-वादौ अन्तरङ्गपरिभाषाऽश्रयणं विनापि स्वरं साधयति भाष्ये

एवं तर्हीति॥ (भा)

[1]स्वरविधाविति। (भा)

अस्य स्वरोद्देश्यकविधित्वादिति भावः॥

[2]अवश्यमेवेति। (भा)

एवं च तयैव सिद्धत्वान्नैतदस्या [3]उदाहरणमिति भावः॥

सा चाप्येषेति। (भा)

प्रकृतोदाहरणविषयपूर्वनिमित्तकमन्तरङ्गमित्यंशो न्यायसिद्ध

---

१ स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीति नाऽस्ति व्यवधानम्। सा तर्हि एषा परिभाषा कर्त्तव्या॥

२ ननु चेयमपि कर्त्तव्या असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे इति। बज्झप्रयोजनैषा परिभाषा। *अवश्यमेवैषा कर्त्तव्या। साचाऽप्येषा लोकतः सिद्धा। कथम्। प्रत्यङ्गवर्त्ती लोको लक्ष्यते। तद्यथा। पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत्-करोति ततः सुहृदां ततः सम्बन्धिनाम्॥

३ अस्योदाहरणम्। सम्॥

---

* अवश्यमेषा कर्त्तव्या। ग। क। किल्हरणमुद्रापितभाष्यपुस्तकेऽपि॥

इति तदनाश्रयणमप्रत्ययमिति भावः ॥ ननु प्रत्ययवयववर्त्ती लोकरूपोऽवयवी लक्ष्यत इति नार्थः प्रकृतानुपयोगादित्यत आह

प्रत्यासन्नेति ॥ (कै)

अङ्गानामिति । (कै)

अङ्गिनं प्रतीतिशेषः ॥

अङ्गमङ्गमिति । (कै)

प्रत्यासन्नवर्त्ती तत्कार्य्याभिनिविष्टो लोको दृश्यत इति भावः। प्रत्यासन्नत्वं च प्रथमोपस्थितत्वरूपम् ॥ भाष्ये शरीरं प्रतीत्यन्वयः। प्रतियोगे द्वितीया ॥ "भोगः" सुखादिसाक्षात्कारः ॥ "आसक्तिः" प्रथमोपस्थितिः। युगपदुपस्थितावित्यम्। क्रमेणोपस्थितावपि आसक्तिवशादेव पूर्वं सुहृदामुपस्थितिरिति बोध्यम् ॥ ननु अन्वितस्य वाच्यार्थेन योगो भवतीत्ययुक्तं शब्दार्थसम्बन्धस्य नित्यत्वात् शब्दस्य विरम्यव्यापाराभावाद् युगपदेव सकलार्थप्रतीतेः क्रमाभिधानमयुक्तमितत आह

नित्येऽपीति ॥ (कै)

[1]असन्तमपीति । (कै)

असत्यमपीति पाठान्तरम्। शब्दजन्यबोधे वस्तुगत्याऽसत्त्वादित्यर्थः। किं तु शास्त्रवासना कल्पितोऽयं प्रक्रियादशायां क्रमः। अर्थवदुद्देश्यकप्रातिपदिकसंज्ञोद्देश्यकङीबाद्युद्देश्येन शास्त्रे स्वादिविधानादिति बोध्यम् ॥ वस्तुतः प्रकृतितदर्थावयवसत्यमेव कुतस्तत् क्रमेऽस्य सत्यतेत्यत आह

---

१ "असत्यमपीति" इतिपाठः सं पुस्तके ॥

प्रकृत्याद्यर्थं चेति ॥ (कै)

असत्यमपीत्यनुक्रुष्यते ॥ भाष्ये

सामान्यभूतेऽर्थे वर्त्तत इति । (भा)

वर्त्तनं नाम सामान्याभिधानम् ॥

विशिष्टे । (कै)

विशेषणविशिष्टे तदैव विशेष्यत्वात् । विशिष्टबुद्धौ विशेषण-ज्ञानस्य कारणत्वादिति भावः ॥

तदनुरक्तेति । (कै)

सामान्यस्य कार्य्यानर्हत्वाद्व्यक्तिस्तदाश्रयतया शब्दार्थत्वेन कल्प्यत इति भावः ॥ भाष्ये

उपजायत (भा)

इत्यस्य बोधविषयो भवतीत्यर्थः ॥

व्यक्तस्येति । (भा)

द्रव्यस्य सतो बुद्ध्यारूढस्येत्यर्थः ॥

तत्पूर्वमिति । (कै)

आश्रयप्रतीत्युत्तरमेव तदाकाङ्क्षणादिति भावः ॥

वस्त्वन्तरेति । (कै)

स्वसमवायिकारणनानात्वस्वपेक्षयेत्यर्थः ॥ एकत्वस्य तस्याऽ-भावादाह

एकत्वेति । (कै)

एवं च प्रयोजनाऽपेक्षया सापि बहिरङ्गेत्यर्थः ॥

सजातीयेति। (कै)

द्रव्यत्वेन स्वाश्रयत्वेन वा सजातीयत्वम्॥ ननु लिङ्गादिभिरेकार्थसमवायाविशेषात् कथं शक्तेर्बाह्यत्वमत आह

कर्मादीनि त्विति॥ (कै)

न्यायप्राप्तः क्रम इति। (कै)

शास्त्रकृत्कल्पितन्यायप्राप्तः प्रक्रियादशायामित्यर्थः। अनेन विशिष्टबुद्धौ विशेषणज्ञानकारणत्वाद्यपि तान्त्रिककल्पितमिति सूचितम्॥ भाष्ये

ययैवेति। (भा)

"अर्थानां" लिङ्गसंख्याकारकाणाम्॥ "प्रादुर्भावो" ज्ञानम्॥ "शब्दानामपि" तद्बोधकस्त्रीप्रत्ययविभक्तीनामपि। अस्य प्रादुर्भाव इति शेषः॥ "तदुत्कार्य्यैरपी" त्यस्य तयैवानुपूर्व्येत्यर्थः। येन क्रमेण-शब्दोपस्थितिस्तेनैव क्रमेणकार्य्यमितिपूर्वमीकारनिमित्तको यणिति भावः। तत्र पदस्यैव विभज्यान्वाख्याने सर्वेषां युगपत्प्राप्तावनयाव्यवस्था। क्रमेणान्वाख्याने तु पूर्वप्रवृत्तिकत्वरूपमन्तरङ्गत्वं [1]पूर्वयणादेशस्य परयणादेशस्य बहिरङ्गत्वं तु निमित्ताभावादप्राप्तत्वरूपं बोध्यम्। अत एव वाय्वोरित्यत्र नासिद्धत्वम्। एवं विधान्तरङ्गत्वस्य दृष्टान्तादिबलेन युगपत्प्राप्तिविषयत्वात्। स्पष्टं चेदं [2]"वाहऊठ्" सूत्रे कैयटे। यत्नयारीत्या पूर्वस्यानिकमप्यन्तरङ्गमिति। तदयुक्तम्। अन्तरङ्गशब्दार्थाभावात्। अङ्गशब्दस्य तत्र निमित्तपरत्वात्॥

---

१ पूर्वयणादेशस्य बोध्यम्। असिद्धत्वं परयणादेशस्य निमित्ताभावाद्—
—। क। ग॥

२ अ ६। पा ४। सू १३२॥

अबधीदिति। (भा)

यद्यपि [1]"अतो लोप" इत्यत्र [2]"आर्धधातुक" इति विषयसप्तमीति [3]"अचोयद्" इति सूत्रस्थभाष्यात्प्रतीयत इत्यपरनिमित्तकत्वात्कथं स्थानिवत्त्वं तथापि विषयसप्तमीत्वेऽपि परबुद्धिनिमित्तकत्वेन परनिमित्तकत्वमस्त्येवेत्याशयः। स्वतन्त्रवधधातुस्तु नास्त्येव अदन्तत्वे [4]"जनिवध्योश्चे"ति वधिग्रहणमपि न कर्त्तव्यमेवेति बोध्यम्॥

बहुखट्वक इति (भा)

भाष्ये। [5]"बहोर्णञ्वदुत्तरपदभूम्नि" इत्युक्तेरिति भावः॥ नन्वादेशस्य सत्त्वादनादिष्टादित्यनुचितमत आह

अकृत एवेति। (कै)

उपलक्षणमेतदिति भावः॥ ननु सूत्रेऽनादिष्टादित्येतदनुपादानात्कथमेतल्लाभोऽत आह

[6]अजपेक्षयेति। (कै)

लक्ष्यानुरोधादिति भावः॥ कर्मणि क्ते अनादिश्यमानादित्यर्थः स्यादत आह

आदेशनमिति। (कै)

बहुव्रीहौ [7]"निष्ठेति" पूर्वनिपातस्तु न। तत्प्रकरणानित्यत्वात्॥ नन्वचः पूर्वत्वविज्ञाने आदेशेन पूर्वत्वस्याऽविशेषणात्तद्यथेत्ययुक्तमत आह

---

१ अ ६। पा ४। सू ४८॥ २ अ ६। पा ४। सू ४६॥
३ अ ३। पा १। सू ६३॥ ४ अ ७। पा ३। सू ३५॥
५ अ ६। पा २। सू १७५॥ ६ अजपेक्षयेति पाठः कैयटेऽस्ति॥
७ अ २। पा २। सू ३६॥

यथेति। (कै)

परमतेन दृष्टान्त इतिभावः॥ पूर्वविध्यभावादाह

धिन्वन्तीति। (कै)

अन्यथेडापत्तिरिति भावः। अत्र यद्वक्तव्यं तदुक्तम्॥ पंचमी-समासाश्रयेण वैयाकरणे दोषमाशङ्क्याह

वैयाकरणेति। (कै)

[1]ऐज्विधानसामर्थ्यात् तत्र न भवति स्थानिवत्त्वमितिपरे॥ विधिग्रहणं स्वाश्रयनिवृत्त्यर्थमित्युक्तत्वात्तत्रादेशलक्षणेत्यसंगतमत आह

भाष्यकारेण त्विति। (कै)

इदं वार्त्तिकमिति न विरोध इति भावः॥

निवर्त्यत इति। (कै)

उत्सृज्यते निवर्त्तते इत्युत्सर्ग इति भावः॥

नत्वानन्तर्य्ये इति। (कै)

पूर्वविधावित्युक्तेः शास्त्रीये कार्य्येऽतिदेशप्रवृत्तिरिति भावः॥

---

१ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्। ७। ३। ३। अनेनैजागमः।
अत्राह भगवान् महाभाष्यकारः।

य्वाभ्यां परस्यावद्वित्वमपवादौ वृद्धेर्हि तौ।
नित्यावैचौ तयोर्वृद्धिः किमर्थं नेति शिष्यते। १॥
यत्र य्वाभ्यां परावद्वित्त्वाधस्वेर्यथा न तौ।
अचामादेर्य्वाभ्यां हि तौ कथं ह्याग्नौतिके न तौ। २॥
यत्र वृद्विरचामादेस्तत्रैचावत्र घोर्हि सा।
अथ कस्मात्पदान्ताभ्यां यथेणो न भवेद्गणः। ३॥

प्रयोगे इति। (कै)

उच्चारणे इत्यर्थः॥ भाष्ये

[1]न हि देवदत्तस्येति। (भा)

हतेऽपि न जीवनं चेत् किं वक्तव्यं तदारोप इत्यर्थः॥

[2]उक्तं वेति। (भा)

[3]"षत्वतुकोरि" त्यत्र वचनद्वयकरणाऽपेक्षो विकल्पः॥

तद्देव नामेति। (भा)

[4]"इको यणचि" इत्यस्मिन्नित्यर्थः॥ चिणो लुकि तग्रहणाभावे किं ततराम्ग्रब्दस्य लुगुच्यते उत तेषां क्रमेण। नाद्यः। संघातस्याप्रत्ययत्वात्। नान्त्य इत्याह भाष्ये

[5]तलोपस्य चेति॥ (भा)

---

१ नह्यन्यस्याऽसिद्धत्वादन्यस्य प्रादुर्भावो भवति। तद्यथा। नहि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति॥ तस्मात् स्थानिवद्वचनमसिद्धत्वं च। वा॥

२ किमुक्तम्। स्थानिवद्वचनानर्थक्यं ग्रास्त्राऽसिद्धत्वात्। वा। स्थानिवद्वचनमनर्थकम्। किं कारणम्। ग्रास्त्राऽसिद्धत्वात्। नानेन कार्य्यासिद्धत्वं क्रियते। किं तर्हि। ग्रास्त्राऽसिद्धत्वमनेन क्रियते। एकादेग्रग्रास्त्रं तुक्ग्रास्त्रेऽसिद्धं भवतीति॥

३ अ ६। पा १। सू ८६॥ ४ अ ६। पा १। सू ७७॥

५ चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्। वा॥ तलोपस्य चासिद्धत्वात्। वा॥ चिणो लुक्। ६। ४। १०४। एतत् सूत्रस्य वार्त्तिकमिति॥

एवमसिद्धवचनमात्रेण निर्वाहमुक्त्वा सूत्रकृतः स्थानिवत्त्वं समर्थयति

[1]काममिति ॥ (भा)

नह्यभावेति । (कै)

"दृह" इत्यस्य सूत्रे इत्यर्थ इति भावः ॥ ननु पूर्वमस्यार्थस्य विधिशब्देन साधितत्वात्कथं तत्करणरूपो न भार इत्यत आह

विधिशब्दं चेति । (कै)

अध्याहारमात्रेणेति भावः ॥ भाष्ये

एवमादेशेऽपि न भवतीति । (भा)

आदेशनिमित्तकोऽपीत्यर्थः ॥ यद्यपि व्यवहितेऽपि पूर्वशब्दो वर्त्तत इति भाष्यकृता पूर्वमेवोक्तं तथापि तदर्थप्रतिपादकवार्त्तिकमवतारयितुं पृच्छति भाष्ये

किं पुनरिति ॥ (भा)

अव्यवहितसम्भवे इति । (कै)

[2][3]"छन्दसि परेऽपि" [2]"व्यवहिताश्च" इत्यनेन पूर्वपरशब्दयोर-

---

१ काममतिदिश्यतां वा सचासचापि नेह भारोऽस्ति ।
कल्प्यो हि वाक्यशेषो वाक्यं वक्तार्थ*धीनं हि ॥
अथवा वतिनिर्देशोऽयं कामचारस्य वतिनिर्देशो वाक्यशेषं समर्थयितुम् । तद्यथा । उष्णीनरवन्मद्रेषु यवाः । सन्ति न सन्तीति । माठरवदस्याः कलाः । सन्ति न सन्तीति ॥

२।३ छन्दसि परव्यवहितवचनं च । इति वार्त्तिकमुक्त्वा "छन्दसि परेऽपि व्यवहिताश्च (१ । ४ । ८१ । ८२ ।) इति वक्तव्यम्" इत्युक्तं भगवता ॥

---

* अधीनमिति । अधुत्तरपदात् खविधानाद् आयत्तार्थवृत्तिः अधीनशब्दः ॥

व्यवहितार्थे मुख्यत्वबोधनादिति भावः ॥ [1]"तस्मिन्" इति सूत्रे निर्दिष्टग्रहणाद्व्यवहिताव्यवहितसाधारणे पूर्वग्रब्दस्य शक्तिः। अन्यात् पूर्वमानयेत्यादि तु तात्पर्य्याऽनुपपत्त्या विशेषे लक्षणा "छन्दसि परेऽपि" इत्यादौ तु पराङ्गविकलायाः [2]"तस्माद्" इति परिभाषाया उपस्थितेरव्यवधानांग्रलाभ इह तु वरे ग्रहणाल्लिङ्गात्तदनुपस्थितिरितितत्त्वम् ॥ भाष्ये एकाननुदात्तग्रब्देन तत्प्रयुक्तः ग्रेषनिघातः ॥

उदात्तत्वमिति । (कै)

प्रत्ययस्वरेण ॥

निघातप्रतिषेधेति । (कै)

[3]"निपातैर्यद्यदि" इत्यनेनेतिभावः ॥

अनाश्रित्येति । (कै)

पदसंस्कारे वाक्यसंस्कारे वा यणो वर्णाश्रयत्वेनान्तरङ्गत्वमित्यन्ये ॥

श्लेष्माऽघ्न इति । (भा)

[4]"अमनुष्यकर्त्तृके च" इति ठक् ॥ ननु संयोगत्वस्य समुदायगतत्वेन पूर्वविधित्वाभावात् कथं स्थानिवत्त्वं किं च न संयोगसंज्ञा व्यवहितस्य विधिरव्यवहितस्य [5]सत्त्वादत आह

---

१ अ १। पा १। सू ६६ ॥ २ अ १। पा १। सू ६७ ॥

३ निपातैर्यद्यदिहन्तकुविन्नेचेच्चण्कच्चिद्यत्रयुक्तम् । ८। १। ३०। एतैर्निपातैर्युक्तं न निहन्यते। "यदग्ने स्यामहत्वम्"। "युवा यदी क्षथः"। "कुविदङ्ग आसन्"। "अचित्तिभिश्चक्रमा कच्चित्"। पुत्रासो यत्र पितरो भवन्ति" ॥

४ अ ३। पा २। सू ५३ ॥ ५ घस्य सत्त्वाद् – । क। ग ॥

कार्य्यार्थत्वादिति। (कै)

ततश्च श्रुतद्वारा व्यवहितपूर्वविधित्वं संज्ञाया इति भावः॥ ननु च उक्तहेतुना व्यवहितपूर्वविधित्वात् कथमनन्तरग्रहणे संयोग-संज्ञाया विधेयत्वमत आह

[१]यथोद्देशेति। (कै)

तदा कार्य्यपर्य्यालोचनं विनापि भविष्यति। किं चिदित्यभि-सन्धिमाचात् तत्प्रवृत्तेरित्यर्थः॥ ननु एवमपि पूर्वपरविधित्वान्न-स्थानिवत्त्वप्राप्तिरत आह

प्रत्येकं चेति॥ (कै)

समुदाय इति। (कै)

एवं चानन्तर्य्याऽऽश्रयणे यथोद्देशपक्षेऽपि न दोष इति भावः॥ एवं च पूर्वमाचग्रहणेऽपि स्नेह्नाश्नेन दोषः। यथोद्देशाऽऽश्रयणादेव कार्य्यकालपक्षेऽपि यत्प्रतिबन्धद्वारा स्थानिवत्त्वस्य संज्ञाकार्य्यप्रति-बन्धकत्वं तस्य पूर्वमाचवृत्तित्वे एव स्थानिवत्त्वमिति गूढतात्पर्य्यम्॥ भाष्ये

किं तर्हि पूर्वपरविधिरिति। (भा)

पूर्वपरविधौ स्थानिवत्त्वाभावादेव च आरतुरित्यादौ [२]"कृच्छ्र-त्वृताम्" इति गुणस्य सवर्णदीर्घे न स्थानिवत्त्वमिति बोध्यम्। विधिग्रहणसामर्थ्याच्चैतदर्थलाभ इत्याशयः॥

---

१ यथोद्देशं संज्ञापरिभाषम्। परिभाषेन्दुशे-२॥

२ अ ७। पा ४। सू ११॥

पूर्वमात्रेति। (कै)

दीर्घादिग्रहणाल्लिङ्गादिति भावः॥ ननूभयनिमित्तत्वेऽपि परनिमित्तत्वमस्त्येवेत्यत आह

परस्मिन्निति॥ (कै)

अवधारणार्थमिति। (कै)

पूर्वविधिशब्दे पूर्वशब्दस्येवास्यापि विशेषणस्यान्ययोगव्यवच्छेदफलकत्वादिति भावः॥

लभ्यत एवेति। (कै)

अविशेषात्सर्वत्र प्रवृत्त्येतिभावः। आयसादित्यत्र [1]"देविकाशिंशपा" इत्यात्वम्॥

तस्यादिवङ्गावादिति। (कै)

ननु आदिवङ्गावे नौ इत्यस्य सर्वनामस्थानत्वेऽपि आयस् इत्यस्याङ्गत्वाभावात् कथं नुम्। औ इत्यस्य सान्तादविहितत्वात् आयस् इत्यस्य षष्ठीनिर्दिष्टादेशत्वाभावान्न स्थानिवत्त्वेन तस्याङ्गत्वमितिचेन्न। छिन्नपुच्छश्ववद् एकदेशविकृतानन्यत्वेनाङ्गत्वप्रतीत्यव्याघातात्। भूयोऽवयवसाम्यात्। लोकन्यायसिद्धस्थानाश्रयणे बीजाभावात्। सूत्रमपि वस्तुसाद्यर्थमावश्यकमिति दिक्॥ भाष्ये

न सिध्यन्तीति। (भा)

निवर्त्यत्वेनेत्यर्थः॥ ननु "अच" इत्यस्य विशेषणस्यान्ययोगव्यवच्छेदकत्वेऽपि हलां व्यावृत्तिः स्यान्नाजन्तरस्येत्यत आह

---

१ अ ७। पा ३। सू १॥

गुणत्वादिति । (कै)

आदेशविशेषणत्वेनेतिशेषः । वस्तुतोऽचोरादेशस्याच्त्वपर्य्याप्त्यधिकरणादेशत्वाभाव इति भाष्याशयः ॥ उभयनिमित्तत्वे किं परनिमित्तत्वमेव नास्तीत्युच्यते उत परमेव निमित्तं नेति । नाद्य इत्याह

अन्वयेति ॥ (कै)

नान्त्य इत्याह

अयोगेति । (कै)

विशेष्यसंगत एवायोगव्यवच्छेदबोध इति नियमे न मानमिति भावः ॥ भाष्ये

अथ हलचोरिति । (भा)

"अच" इत्यपि परस्मिन्निति वदयोगव्यवच्छेदकमुतान्ययोगव्यवच्छेदकमिति प्रश्नः ॥

अत्यरराजादिति । (कै)

राजानमतिक्रान्तवानित्यर्थः । [१]"प्रातिपदिकाद्धात्वर्थे" इति णिजिष्ठवद्भावाट्टिलोपश्चेति बोध्यम् । पूर्वस्य विधौ इत्यनाश्रित्येदम् ॥ भाष्ये

एकादेश इति । (भा)

[२]"अतो गुण" इति पररूपमित्यर्थः ॥ "यस्येति च" इति तु न । टिलोपस्याभीयत्वेनासिद्धत्वादिति भावः ॥

---

१ प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च । गण – सू ॥

२ अ ६ । पा १ । सू ९७ ॥

विंशं शतम् (भा)

इत्यस्य विंशतिरधिकास्मिन् इत्यर्थः॥ "विंश" इति तु प्रक्षिप्तं शतसहस्रयोरेव उस्येष्टत्वात् ॥

स्थानिनो ऽनादिष्टादिति ॥ (कै)

अत्र यदुक्तव्यं तद् [१]"न धातु" इति सूत्रे स्थानिवत् सूत्रेचोक्तम्॥ कैकेयादौ [२]"कैकयमित्रयु" इत्यादिना इयादेशे [३]"आद्गुणः"। अत्रापि पक्षे स एवार्थ इत्यत आह

परिहारान्तरस्येति । (कै)

पक्षान्तरस्येत्यर्थः । "एतत्" पूर्वोक्तम् ॥

लोपस्येति । (कै)

समानाधिकरणेन सुपेत्यधिकारात्परसन्निधाने जायमानत्वेन परनिमित्तत्वमित्यभिमानः । वस्तुत एतावता परनिमित्तत्वे [४]"पादशतस्य" इति लोपस्य परसन्नियोगेन विधीयमानस्य परनिमित्तत्वापत्तिः । इदमपि चिन्त्यम् । परिहारान्तरस्येत्येवाचापि समाधिरिति तत्त्वम् ॥

उपादानादिति । (कै)

यद्यप्यागत्येत्येतद्वारणार्थमावश्यकं तत् तत्र हि केवलहलो लोपस्तथापि व्याख्यानादत्र एवादेश इत्यन्ययोगव्यवच्छेदलाभ इति बोध्यम् ॥

---

१ अ १। पा १। सू ४॥ २ अ ७। पा ३। सू २॥
३ अ ६। पा १। सू ८७॥ ४ अ ५। पा ४। सू १॥

साक्षादेवेति । (कै)

अचो यत्र स्थानषष्ठीनिर्दिष्टत्वमित्यर्थः । एवं हि णिलोपस्य स्थानिवत्त्वं न स्यात्तस्मादच एवादेशः प्रयोगे यत्रेत्यर्थेन तदारणमुचितम् ॥

किं पुनरिति । (भा)

आश्रितस्थानिककार्य्यमेव स्थानिवद्भावेन प्राप्यते उत अनाश्रितस्थानिकं प्रतिबध्यतेऽपीतिप्रश्नः । यद्यप्ययं विचारः प्राक् कृत एव भावाऽभावातिदेश इति सिद्धान्तश्च कृतस्तथापि अन्यवार्त्तिककारकृतवार्त्तिकव्याख्यानमिदमिति बोध्यम् ॥ ननु संयोगसंज्ञेतिवक्तव्ये किमुच्यते गुरुविधिरिति अत आह

कार्य्येति ॥ (कै)

नन्वचि नेत्यर्थाद् द्विर्वचननिषेधेऽस्त्येव स्थान्याश्रयणमत आह

पर्य्युदासेति । (कै)

चिन्त्यमेतत् । वाक् वाक्क् इत्यादाववसाने द्वित्वाऽनापत्तेः । हलीत्येव वक्तुं युक्तत्वाच्चेत्याहुः । तस्माद्भिन्नस्याश्रयणं नत्वच इति वक्तुं युक्तम् । वागित्यादावभिन्नो वर्णाऽभाव एवेति न दोषः ॥

यङ एवेति । (कै)

एवं सति पक्षद्वयेऽपि "वरे" ग्रहणं न कार्य्यमित्यत्र तत्करणकथनं चिन्त्यमेव स्यात् । किं च तार्किकप्रत्ययत्वमादायाऽपि प्रवृत्तिज्ञापनाय तदावश्यकमिति चिन्त्यम् । वरे यलोपेत्येकमेव निमित्तमित्यभिमानेन भाष्यमित्यन्ये ॥

क्नस्येति । (कै)

[1]"क्नस्याऽचि" इति क्नलोपे कृतेऽपि [2]लुग्वक्तव्य इति वार्त्तिकार्थः । पक्षान्तरे तु क्नलोपेनैव सिद्धमित्यभिमानः ॥ तत्राऽप्यवश्यं लुग्वक्तव्य इत्याह

अदुह्नहीति ॥ (कै)

भाष्ये

[3]घ्नन्तीत्यादि । (भा)

[4]"गमहन" इत्यनेनाऽनुपधलोपः । घत्वम् । [5]"हो हन्तेः" इत्यनेन ॥

भाष्ये

[6]जग्ध्यादिघ्वादेशस्येति । (भा)

जग्ध्यादिषु विषयेषु आदेशस्यार्थात्तद्रूपस्येत्यर्थः ॥

एकादेशविकृतस्येति । (कै)

अन्तरङ्गत्वाद्वृद्धौ कृतायां णिलोप इति आदित्यस्यानादिष्टादचः

---

१ अ ७ । पा ३ । सू ७२ ॥

२ क्नलोपे लुग्वचनम् । वा । क्नलोपे लुग्वक्तव्यः ॥

३ हन्तेर्घत्वम् । वा । हन्तेश्च घत्वं वक्तव्यम् । घ्नन्ति । घ्नन्तु । अघ्नन् । अस्तु तर्ह्याश्रीयमाणायां प्रकृताविति ॥

४ अ ६ । पा ४ । सू ९८ ॥ ५ अ ७ । पा ३ । सू ५४ ॥

६ ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः । वा । ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशस्य प्रतिषेधो वक्तव्यः । निराद्य । समाद्य । "अदो जग्धिर्ल्यप्ति किति (२ । ४ । ३६) इति जग्धिभावः प्राप्नोति ॥

(अचः परस्मिन् पूर्वविधौ। १। १। ५७।) (अ. १। पा. १ आ. ८)

पूर्वत्वमस्त्येव। [१]"ण्यक्षत्रियार्ष" इति तु णिच्स्थानिकवृद्ध्यादेर्बाधकम्। उक्तरीत्या वा तस्य तत्त्वम्॥ वार्त्तिके

[२]युलोपेति। (भा)

यकारोकारयोर्लोप इत्यर्थः॥ अकुर्व्याग्रामित्यादौ वाक्यसंस्कार-पक्षे परस्य यणादेशे तत् तत् कार्य्यप्राप्तिरिति बोध्यम्॥

बहिरङ्गेति। (कै)

वाय्वोरित्यत्र यथाऽस्य न प्राप्तिस्तथोक्तमेवमन्यत्राऽपि बोध्यम्॥

आत्मने पदमिति। (कै)

दृडितिग्रहेषः॥ नन्वणन्तं सौर्य्य इत्येवोदाहृियतामत आह

सौर्य्ये इत्यत्रेति॥ (कै)

यस्येतिचेत्यादाविति। (कै)

आदिना [३]"सूर्य्यतिष्ये"ति यलोपः॥ [४]"ष्यां" स्त्रीप्रत्यये। अलोपस्यासिद्धत्वन्तु न व्याश्रयत्वात्। "गार्ग्याभ्याम्" इत्यत्र गार्ग्य-आभ्यामितिस्थिते पूर्वं [५]"सुपि च" इति दीर्घे यलोपाप्राप्तिरिति बोध्यम्॥

पर्य्युदासाश्रयणे त्विति। (कै)

अङ्गिन्नत्वेन प्रकृत्याऽऽश्रयणात् स्थानिवत्त्वप्रवृत्त्या अङ्गिन्नत्वसत्त्वेन यलोप इति भावः॥

---

१ ण्यक्षत्रियार्षञितोयूत्र्यङ्गायुवादिवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम्। वा। ६। ४। ४८॥

२ यणादेशे युलोपेत्वानुनासिकत्वप्रतिषेधः। वा॥

३ अ ६। पा ४। सू १४९॥ ४ औङः ष्यां प्रतिषेधो वक्तव्यः। वा॥

५ अ ७। पा ३। सू १०२॥

संयोगसंज्ञाया इति। (कै)

अस्याश्रय उक्तः। वस्तुतः प्लुतस्य चैपादिकत्वात् [1]"पूर्वत्रासिद्धे न स्थानिवत्" इत्यनेनापि सुसाधम्॥

अत एव स्त्रिङ्गादिति। (कै)

न च पुत्रमासमन्तादत्तुं शीलं यस्याः पुत्रादिनीत्यादौ स्थानिवत्त्वा[2]"न्नादिनी"त्यस्याप्रवृत्तौ द्वित्वं प्राप्नोति तद्वारणाय द्विर्वचनग्रहणं कथमभावातिदेशे ज्ञापकमिति वाच्यम्। एतद् भाष्यप्रामाण्येन तस्यानभिधानात्। शीघ्रोपस्थितिकत्वेनाङ्रहितादिनीशब्दस्यैव तत्र ग्रहणाच्चेतिदिक्॥

न पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्च-र्विधिषु।१।१।५८॥

ननु स्थानिवत्त्वनिषेधं विना मस्य पदान्तत्वेनाऽसिद्धेस्तस्य रुत्वसम्पादके पदत्वे स्थानिवत्त्वस्य दुर्वारत्वात् मान्तस्य पदत्वाभावेन कथमत्र रुत्वप्राप्तिरत आह

---

१ पूर्वत्रासिद्धे च। वा। (१। १। ५८)॥

२ अ ८। पा ४। सू ४८॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजश्चर्विधिषु। १। १। ५८।)

[१]भावेति। (कै)

पदान्तेति च भावप्रधानो निर्देश इत्यपि बोध्यम्। दृदं चिन्त्यम्। द्विर्वचनादिसाहचर्येण पदान्तपदार्थस्य ग्राह्यीयस्यैव ग्रहणौचित्यात्। भाष्यं त्वेवं व्याख्येयम्। रुत्वस्य पदचरमावयवत्वेन तच्च कर्त्तव्ये तन्निष्पादकपदत्वे च कर्त्तव्ये भावसाधनविधिग्रब्दाश्रयणे टिलोपस्य स्थानिवत्त्वनिषेधाद्रुत्वं प्राप्नोतीत्यर्थः। यद्यपि पदसंज्ञा न पदचरमावयवो नापि पदान्तस्थाने विधिस्तथापि तस्याः कार्य्यार्थत्वात् कार्य्यस्य च रुत्वस्य तत्त्वान्नदोषः। पदचरमावयवसाधकस्यापि तत्त्वेन ग्रहणमित्याशयः॥ सिद्धान्त्येकदेशाह

[२]भसंज्ञाऽत्रेति। (भा)

भत्वे प्राप्तस्थानिवद्भावस्यापि सान्तनिष्ठपदत्वाऽप्रतिबन्धद्वारा रुत्वसंपादकत्वेन भत्वस्यापि पदान्तग्रहणेन ग्रहणात्तत्रापि स्थानिवत्त्वनिषेध इति सान्तनिष्ठभत्वेन तन्निष्ठपदत्वबाध इति भावः। "न पदान्त" सूत्रदृष्ट्या त्रिपादी तु नाश्रिद्धा। जग्धादिग्रहणात्। कैयटोक्तरीत्या पूर्वपक्षयोजनेऽस्यायं भावः। भत्वे स्थानिवद्भावस्य सकारनिष्ठपदान्तत्वसम्पादकतया परम्परया भसंज्ञाया अपि पदा-

---

१ वेतस्थानिति भाष्यप्रतीकमुपादाय "भावसाधनविधिग्रब्दाश्रयेणोच्यते वेतसग्रब्दात्" कुमुदनडवेतसेभ्यो ड्मतुम् (४। २। ८७) इति ड्मतुपि टिलोपे कृते स्वादौ पूर्वं पदमिति पदसंज्ञायां सकारः पदान्तत्वं प्रतिपद्यते इति पदान्तताया विधीयमानत्वात् स्थानिवत्त्वनिषेधाद्रुत्वप्रसङ्गः" इत्युक्तम्॥

२ भसंज्ञाऽत्र बाधिका भविष्यति॥

(अ. १। पा. १। आ. ८) (न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । १। १। ५८।)

न्तत्वसम्पादकत्वेन पदान्तत्वमिति तस्यापि निषेध इति समानावधिकत्वाद्भत्वेन पदत्वबाध इति । [१]एवं परम्परया पदान्तत्वसम्पादकस्यापि पदान्तविधिग्रब्देन ग्रहणे मदुक्तरीत्यैव पूर्वपक्षयोजनाऽप्युचिता ॥ ननु ङ्मतुपोऽर्थान्तरेऽपि विधानात् कथं सर्वत्र भत्वमत आह

[२]अनभिधानादिति । (कै)

मतुग्रब्देन प्रसिद्धत्वाद् मतुप एव ग्रहणमिति भावः ॥ तत्र पूर्वपक्ष्याह

अकारान्तमेतदिति । (भा)

साक्षात् परम्परया वा पदान्तकार्यप्रतिबन्धकस्य प्रापकस्य वा निषेधे परम्परा पदान्तपदे उपस्थिते पदत्वद्वारिकैव नान्यद्वारिकेति भत्वे न निषेध इति सान्तत्वाभावात्तद्प्राप्तिरिति भावः ॥ सिद्धान्त्येकदेश्याह

ननु चेति । (भा)

अत्र पदस्योद्देश्यतयैतत्साध्यपदत्ववत्समुदायान्त्यकार्ये नायं निषेध इति पदत्वेऽपि स्थानिवत्त्वात् सान्तस्य पदत्वाभावेन रुत्वाभावः सिद्ध इति भावः ॥ तत्र किमपेक्षया सम्प्रतीत्यत आह

स्थानिवत्त्वनिषेधादिति । (कै)

एतत्साध्यपदत्ववतोऽत्रोद्देश्यत्वाऽसम्भवः । भावसाधनेऽपि विधेयस्य

---

१ एवं च । ख । ग ॥

२ तदस्मिन्नस्तीत्यत्रैवार्थे ङ्मतुप् न निर्दृत्तादिषु अनभिधानादित्येतदाश्रित्यैतदुच्यते । अकारान्तमेतदिति भाष्ये ॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजश्चर्विधिषु । १। १। ५८ ।)

पदचरमाऽवयवत्वं स्थानिद्वारैव वाच्यमिति स्थानिनः स्थानिवद्भावेन तत्त्वाऽभावे विधेयस्य सुतरां तदभाव इति भावः । स्थानिवत्त्वनिषेधं विना यः पदत्वेन सिद्धस्तस्य चरमावयवे कर्त्तव्य इत्यक्षरार्थः । सम्प्रतिपदग्रब्देन समस्तेनान्तग्रब्दस्य षष्ठीतत्पुरुष इति बोध्यम् । यद्यपि [१]"तस्य भाव" इत्यादौ तल्लाक्षणिकप्रत्ययान्तादेरणुद्देश्यता तथाऽप्यत्र लक्ष्यानुरोधादेवमर्थकत्वमिति तात्पर्य्यम् ॥ पूर्वपक्षी उक्तमाग्रयमजानानः सम्प्रतीति पदान्तस्य विग्रेषणं मन्यमान आह भाष्ये

कर्मसाधनस्येति । (भा)

सम्प्रतिपदान्तस्य स्थाने विधाविति हि तदर्थः ॥

तच्च भावसाधनस्येति । (भा)

कर्मसाधनत्वे हि द्विर्वचनादिभिः सामानाधिकरण्यं पदान्ते वैयधिकरण्यं च स्यात् । भावसाधने पदचरमावयवद्विर्वचनादिकर्मक-विधाने इत्यर्थः । तच्च हि पदचरमावयवत्वेन सिद्धकर्मके विधाने वक्तुमग्रक्यं सिद्धत्वे विधानवैयर्थ्यात् । एवं चाकारान्तमेतद् इति प्रतीकोक्तयुक्त्या पदत्व एव स्थानिवत्त्वनिषेधात् सान्तमेव पदत्वं प्रति भत्वे तु निषेधाभावाद् अकारान्तं भत्वं प्रतीतिस्यादेव त्वमिति भावः ॥

जश्त्वं प्राप्नोतीति । (भा)

[२]"झलां जग्गोऽन्ते" इत्यस्य पदचरमावयवविधायकत्वात् । जग्-ग्रहणं तु [३]"झलां जग्" इति जग्त्वे तन्निषेधार्थम् ॥

---

१ अ ५ । पा १ । सू ११९ ॥ २ अ ८ । पा २ । सू ३९ ॥
३ अ ८ । पा ४ । सू ५३ ॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्त्वविधिषु। १। १। ५८।)

एकादेशस्यैवेति। (कै)

अत एव "उभयत आश्रये न" इत्यनेन वक्ष्यमाणं समाधानं संगच्छते॥ सिद्धान्त्येकदेश्याह

अस्ति पुनरिति॥ (भा)

पूर्वपक्ष्याह

इह कानीति। (भा)

इह पदान्त एव यकारादिर्विधेय इति भावसाधनेऽपि सिद्धतीति भावः॥

असाधारणमिति। (कै)

भावसाधनपक्षमाश्रित्य साध्यमित्यर्थः॥ भाष्ये

[1]षडिकश्चाऽपीति। (भा)

अचैकादेशाऽलोपान्तसपादसन्नाधायीस्थकार्य्यप्रवृत्तियोग्यतयाऽसिद्धत्वेन जश्त्वाप्रवृत्तिस्तदनन्तरत्वल्लोपस्य स्थानिवत्त्वप्रसक्तिस्तत्र

---

१ षडिकश्चाऽपि सिद्धो भवति। भा। षडङ्कुलिशब्दाद् "वक्षचो मनुष्यनाम्नष्ठज्वा" (५। ४। ७८) इति टचि क्ते "ठाजादावूर्ध्वम्" (५। ३। ८३) इति ङ्कुलिशब्दस्य लोपे "यस्येति" (६। ४। १४८) लोपे षधित्यय शब्दोऽन्तर्वर्त्तिन्या विभक्त्या सिद्धः पदत्वेनेति पदान्ततया व्यविधानान्नास्ति स्थानिवत्त्वनिषेधः इत्यकारलोपस्य स्थानिवद्भावादकारान्तस्य भसंज्ञा। पदसंज्ञा तु अन्तर्वर्त्तिविभक्त्याश्रयेण षकारान्तस्येति सिद्धं जश्त्वम्। कर्मसाधने तु षधः षकारः पदान्तत्वेन सिद्ध इति स्थानिवत्त्वनिषेधात् षकारान्तस्यैव भसंज्ञेति तुल्यावधिकया भसंज्ञया पदसंज्ञाया एकसंज्ञाधिकाराद् बाधनाज्जश्त्वासिद्धिः॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजश्चर्विधिषु । १। १। ५८ ।)

कर्मसाधने "यस्येति" लोपे दृक् निमित्तभूतेन समासान्तर्वर्त्ति-विभक्तिनिमित्तकपदत्वस्यापि निवृत्तेः षडिकासिद्धिः ॥ न च भत्वे स्थानिवत्त्वमस्त्वोपस्येति न समानावधिकत्वं भत्वपदत्वयोरिति वाच्यम् । साक्षात् परम्परया वा पदान्तस्थानिकविधिप्रापकप्रतिबन्धकस्थानिवत्त्वस्य निषेधेन भत्वेऽपि तन्निषेधात् । पदान्तत्वेन सिद्धस्य विधावित्यर्थे पदत्वस्य सिद्धत्वेन तद्वारकपरम्परायां वक्तुमग्रक्ष्यत्वेनान्यद्वारिकायां अपि ग्रहणात् । भावसाधनत्वे तूपस्थितपदत्वद्वारिकैव परम्पराऽऽश्रीयते इति भत्वे निषेधाभावेन स्थानिवत्त्वाद्-कारान्ते भत्वेऽपि षान्ते पदत्वस्याव्याघातेन न दोष इत्याशयः ॥ कैयटे

पदान्तताया अविधानादिति । (कै)

पदत्वस्याविधानेन धर्मविशिष्टत्वेनाऽपि पदान्तस्याविधानादिति भावः ॥

सिद्ध इति । (कै)

जश्त्वे कार्ये इति शेषः ॥ सिद्धान्त्येकदेशाह

वाचिकस्त्विति ॥ (भा)

चकारस्येति । (कै)

वाचिकेऽपि वागग्रीर्दत्तशब्दात् ठचि [१]"ठाजादौ" इति ग्रीर्दत्त-शब्दलोपे [२]"यस्येति" लोपे पूर्वोदाहरणे डलवद्वापि कुत्वापत्तिरिति भावः । एवं मदुक्तरीत्या भाष्यस्य सामञ्जस्ये "कथं पुन-

१ अ ५। पा ३। सू ८३ ॥ २ अ ६। पा ४। सू १४८ ॥

रित्यादि"'"नं ह्यत्र पूर्वत्रासिद्धीयं किं चित्कार्य्यं विधेयम्" इत्यन्तः कैयटश्चिन्त्यः। स्फुटार्थत्वाच्च न व्याख्यातः। तथा हि। पूर्वमेव उस निष्पन्नत्वादित्यसङ्गतं सपादपन्नाध्यायीस्थकार्य्यप्रवृत्तियोग्यतया तदप्राप्तेः। किं च षकाररूपापत्तिर्न शास्त्रीया। पदचरमावयवस्य शास्त्रीयस्यैव ग्रहीतुमुचितत्वाद् इत्याद्यूह्यम्॥ सिद्धान्त्याह

[1]कर्त्तव्योऽत्रेति॥ (भा)

[2]पञ्चमे वक्ष्यमाणयत्नं दर्शयति॥

---

१ कर्त्तव्योऽत्र यत्नः। भा॥

२ पञ्चमे "प्रेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् (५। ३। ८४) इति सूत्रव्याख्यानावसरे उक्तं भगवता। तथाहि। "इह षडङ्गुलिः षडिक इत्यजादिलोपे कृते पदसंज्ञा न प्राप्नोति। तत्र को दोषः। जश्त्वं न स्यात्।

षडिके जश्त्व उक्तम्। वा।

किमुक्तम्। "सिद्धमचः स्थानिवत्त्वाद् (यचि भम्। १। ४। १४। एतत् सूत्रस्यवार्त्तिकम्) इति।

वाचिकादिषु पदवृत्तप्रतिषेधः। वा।

वाचिकादिषु पदवृत्तस्य प्रतिषेधो वक्तव्यः। वागाग्नीर्दत्तः वाचिक इति।

सिद्धमेकाक्षरपूर्वपदानामुत्तरपदलोपवचनात्। वा।

सिद्धमेतत्। कथम्। एकाक्षरपूर्वपदानामुत्तरपदस्य लोपो वक्तव्यः। इहापि तर्हि प्राप्नोति। षडङ्गुलिः षडिक इति।

षषष्ठाजादिवचनात् सिद्धम्। वा।

षषष्ठाजादिवचनात् सिद्धमेतत्"॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। १। १। ५८।) (अ. १। पा. १। आ. ८)

एकेति। (कै)

तथाचाज्ग्रहलादेशत्वादाचिके भवेऽपि न स्थानिवत्त्वमिति भावः। एवं च भावसाधनपचोऽत्रस्थितः॥ पूर्वपक्ष्याह

कथं ब्रह्मबन्धेति॥ (भा)

सिद्धान्त्येकदेशी उक्तमपि यः सम्प्रतिपदान्त दत्येवं रूपं सिद्धान्तं परेण गृहीतत्वात् पचानुरूपबलिन्यायेनाह

[1]उभयत इति॥ (भा)

तद्व्याचष्टे

यस्मात् स्वादिविधिरिति। (कै)

अत एवाच [2]नैकदेशविकृतन्यायेन धान्तस्य पदत्वसम्भावना। उकारान्तादूङ्विधानेनाकपरिमाणसंज्ञात्वेन दुर्लभत्वात्। "उभयत आश्रयणे" दत्यस्यैकदेशिमतत्वाच्च। एतच्च [3]"अन्तादिवत्" सूत्रे वक्ष्यते॥ पूर्वपक्ष्याह

कथं वेतस्वानिति॥ (भा)

अथ वेतस्वानित्येवं जातीयकानामेतदनुदाहरणत्वमेवेति बोधयितुं वास्तवं सिद्धान्तमाह

नैवमिति॥ (भा)

तद्व्याचष्टे

---

१ उभयत आश्रयणे नान्तादिवदिति। भा॥

२ एकदेशविकृतमनन्यवत्। ३७ परिभाषेन्दुशे-॥

३ अ ६। पा १। सू ८५॥

न च ब्रूतुबिति। (कै)

एवं ब्रह्मबन्धूशब्दे ऊकारो न पदमिति बोध्यम्। नन्विदमयुक्तं [1]गतिकारकोपपदानां सुबुत्पत्तेः पूर्वं समासेऽसुबन्तत्वेन सुबन्तेन समासे [2]"उत्तरपदत्वे च" इति [3]प्रत्ययलक्षणनिषेधेन चोत्तरस्यापदत्वाद् गोऽचेत्यादावल्लोपस्य स्थानिवत्वेनावङादापत्तेरिति चेन्न। उत्तरपदस्य कार्य्यित्वे एव प्रत्यासत्त्या तन्निषेधप्रवृत्तेः। अत्र चेदं भाष्यमपि मानम्। सुबुत्पत्तेः पूर्वं समासस्य चैतद्विषयेऽनित्यत्वान्नप्रवृत्तिरिति भावः। एवं च विग्रहद्वयप्रदर्शनेन पदचरमावयवे कर्त्तव्ये परपदस्याजादेरेव न स्थानिवदिति भाष्ये ध्वनितं कानि सन्तीत्याद्येवोदाहरणम्। एवं च पूर्वसूत्रेऽपरविधाविति प्रघट्टकस्यकैयटग्रन्थो [4]"भो भगो" इतिसूत्रस्थकैयटग्रन्थश्च चिन्त्य एव। एवं षडिके इत्याद्यपि चिन्त्यम्। दृकस्य पदत्वाभावेऽपि ङ्गुलिशब्दाकारयोर्लोपे तस्य स्थानिवद्भावेन पदत्वात्तस्मिन्नन्तस्य विधिसत्त्वेन दोषादिति दिक्॥ भाष्ये

पदस्यान्त (भा)

इति पूर्वपक्षे पूर्वपक्ष्यभिमते एकपदस्याऽजादेरस्य स्थानिवत्त्वनिषेधे-

---

१ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः। ७५। परिभाषेन्दुशेखरे॥

२ उत्तरपदत्वे चापदादिविधौ। वा। नलुमताङ्गस्य। १। १। ६३। एतत् सूत्रस्य वार्तिकम्॥

३ अ १। पा १। सू ६२॥ ४ अ ८। पा ३। सू १७॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घञ्चर्विधिषु । १। १। ५८।)

ऽपि न दोष इति प्रौढ्याप्रतिपादयितुं भसंज्ञाच्च बाधिका भविष्यतीति स्वोक्तेरेकदेशाग्रयमाह

अथवेति । (भा)

यः सम्प्रतिपदान्त इत्येतत्तु न ग्रब्दमर्य्यादालभ्यमितिभावः । अस्य पक्षस्य कैयटोक्तव्याख्या चिन्त्या। तावताऽपि भसंज्ञायाः पदान्तविधित्वानुपपादनात् । किं च यथा कारकाधिकारे कारकं सत्कर्मेतिव्याख्यानेन तयोः संज्ञयोः समावेग उक्तस्तथाऽत्रापि स्यात् । न हि भत्वपदत्वयोः समावेग दृष्टः । तस्मादेवं व्याख्येयम् । यथा रुत्वजग्त्वादीनां साक्षात् प्रापकः प्रतिबन्धको वा स्यानिवङ्भावः प्रतिबध्यते तथा भसंज्ञाविषयातिदेग्स्यापि परम्परया तत्त्वाद् निषेध इति । यथैवान्यानि पदकार्य्याणि पदचरमावयवकार्य्याणि रुत्वजग्त्वादीनि तत्प्रापकपदसंज्ञारूपं चात्र सूत्रे उपन्यस्तवन्ते। पदान्तविधिग्ब्देन ग्रह्यन्ते । पदचरमावयवप्रापकाद्यपि तत्त्वेन ग्रह्यते । एवमिदमपि भसंज्ञारूपमपि । पदकार्य्यम् परम्परया पदचरमावयवप्रापकं प्रतिबन्धकं वा पदचरमावयवत्वेन ग्रह्यते इत्यर्थः । अयं भावः । यथा पदान्तपदे उपस्थितत्वात् पदत्वद्वारिका परम्परा ग्रह्यते तथा पदत्वबाधकतया भत्वस्यापि प्रत्यासन्नत्वेन तद् द्वारापि पदचरमावयवविषयस्यानिवत्त्वप्रतिषेध इति ॥ "षडिके" तु [१]"षष्ठाऽजादिवचनात्सिद्धम्" इति [२]द्वितीयादच ऊर्ध्वलोपविधायकवचन-

---

१ अ ५। पा ३। सू ८४। एतत् संख्याक्रसूत्रस्यवार्त्तिकम् ॥
२ अ ५। पा ३। सू ८३ ॥

प्रामाण्यात्तद्विषये न भवद्वारा पदचरमावयवसंपाकस्थानिवत्त्वप्रतिषेध इति न दोषः। वार्त्तिके त्वेवं न दोषः। उत्तरपदलोपविधानात्। पंचमे चेदमुपपादयिष्यते। एवं च आमलकी तटी सारसीत्यादौ जश्त्वादिप्रसक्तिरेव नेति बोध्यम्। यद्यपि "पूर्वत्राऽसिद्धे न स्थानिवदि"ति निषेधोऽत्र प्राप्नोति। तथापि विधिशब्दो भावसाधनोऽन्तशब्दश्चरमावयववाचीत्यादिसिद्धान्तान्बोधयितुं पूर्वत्राऽसिद्धे इत्यादावपि साक्षात्परम्परया वा प्रापकप्रतिबन्धकस्य निषेध इत्यादिबोधनितुं पदेऽन्त इति सप्तमीसमासेन "वेतस्वान्" इत्यादौ "न पदान्ते"ति निषेधवारणेन "पूर्वत्राऽसिद्धे ने"त्यत्र पदचरमावयवविधायकातिरिक्तस्यैव ग्रहणमेवं जश्पदेनेति बोधयितुमुपन्यास इति बोध्यम्॥ भाष्ये

अवर्णलोपविधिमिति (भा)

[1]"आतो लोप इटि च" इत्येतं प्रतीत्यर्थः। एवं च वरे यलोपग्रहणे कृतेऽपि "यायावर" इत्यस्याऽसिद्धिरितिशङ्का॥ यातिरित्यस्याचाऽसिद्धेः सिद्धान्तमाह

अथवेति॥ (भा)

यलोपे किमिति। (भा)

"यायावरे" यलोपस्य वरे इत्यनेनैव सिद्धत्वान्नप्रः॥

[2]क्वौ लुप्तमिति। (भा)

यद्यप्यप्रत्ययग्रहणेन विजण्युच्यते तथापि तस्य क्वाचित्कत्वान्नदोषः। क्विग्रहणं विचोऽण्युपलक्षणमित्यन्ये॥ कैयटे

---

१ अ ६। पा ४। सू ६४॥ २ क्वौ लुप्तं न स्थानिवत्॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजश्चर्विधिषु । १। १। ५८ ।)

उक्तं हीति । (कै)

[1]"कण्ड्वादिभ्यो यग्" इत्यत्र भाष्ये ॥

उपधात्वविधिं प्रतीति । (भा)

"प्रत्ययविधौ" इत्यनाश्रित्येदम् ॥

तत इति । (कै)

आदित्यशब्दादित्यर्थः । आदितेरपत्यं ष्यान्नादेवतार्थे ष्य इति तु नोक्तम् । [2]"आपत्यस्य" इत्यस्य प्राप्त्या पूर्वत्रासिद्ध इत्युत्तरग्रन्थासङ्गतेः । तस्मादेतत् खण्डनमेतदज्ञानेनैवेति बोध्यम् ॥

कण्डूतिशब्दस्येति । (कै)

विशेषणत्वादित्यर्थः ॥ न चाचालोपस्य स्थानिवत्त्वादुवङ् एव स्यादिति वाच्यम् । जाते तत्रोठा सिद्धेः । ऊठि तु न स्थानिवत्त्वमनादिष्टादचः स्थानिवत्त्वाभावात् । अस्मादेव भाष्यप्रयोगात् स्थानिद्वारकं तदाश्रयणं क्वाचित्कमित्याहुः ॥ ननु [3]"ङिती"तिवचनसामर्थ्यात् स्यादेवेत्यत आह

कारक इतीति । (कै)

अत्र वचनं सावकाशमिति भावः ॥

स्वरविधौ इति (कै)

हल्स्वरप्राप्तेः सत्त्वादिति भावः ॥

---

१ अ ३ । पा १ । सू २७ ॥ २ अ ६ । पा ४ । सू १५१ ॥
३ अ ६ । पा १ । सू १९३ ॥

अन्यव्यवधाने इति। (कै)

अज्व्यवधाने इत्यर्थः। अज्व्यवेति वा पाठः। लुप्ततया तदनुच्चारणेन तदाश्रयस्यापादथितुमशक्यत्वात्तस्य स्यादिति नापादितं [1]स्वविधौ स्थानिवत्त्वाभावाच्च॥ ननु "लिती"त्यत्र "प्रत्ययात्पूर्वमि"त्यनुवृत्तेः पूर्वग्रहणस्य सत्त्वा[2]न्निर्दिष्टपरिभाषाऽनुपस्थितिः पूर्वशब्दस्य व्यवहितेऽपीति न दोषोऽत आह

यत्र त्विति। (कै)

तत्राव्यवधानारोपेणैव प्रयोगः पूर्वादीनां चाव्यवहिते एव शक्तिरिति भावः॥

यत्र त्विति। (कै)

मुख्ये संभवति आरोपितग्रहणे मानाभाव इति भावः। परन्त्विदं चिन्यम्। [3]"तस्मिन्निति" सूत्रे निर्दिष्टग्रहणात्। तस्मादुत्तरांशविकलपरिभाषोपस्थितेः [4]"प्रत्ययः" [5]"परश्च" इत्यादौ दृष्टत्वाद्दाप्युपस्थितिरितितत्त्वम्॥

पक्षे स्यादिति। (कै)

[6]"अनुदात्तं पदम्" इति वचनात् पक्षे इत्युक्तम्। चिकीर्षक इत्याद्यर्थमावश्यकेन निषेधेनैव सिद्धेर्लित्त्वसामर्थ्यमेव कथमिति चिन्यम्॥ भाष्ये

---

१ स्वरविधौ। सम्॥ २ तस्मिन्निति निर्दिष्टे पूर्वस्य। १। १। ६६॥
३ अ १। पा १। सू ६६॥ ४ अ ३। पा १। सू १॥
५ अ ३। पा १। सू २॥ ६ अ ६। पा १। सू १५८॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजस्सर्विधिषु। १। १। ५८।)

पंचारत्य इति। (भा)

अन्तरङ्गत्वेनापीदं सिद्धम्। बह्वखट्वक इत्युदाहरणम्। अत्र कपि [1]"आपोऽन्यतरस्याम्" इति ह्रस्वत्वे तस्य स्थानिवत्त्वाद् ह्रस्वान्तेऽन्यादिति खरो न भवति। "प्रतिदीव्ने"त्यत्र बहिरङ्गत्वेनासिद्धत्वमल्लोपस्येति न शङ्क्यम्। त्रिपाद्यां तदप्रवृत्तेः। "वाय्वोरि"त्यत्रापि यथा न सा तथोक्तम्॥

रेफेति। (कै)

अत्र तु नान्तं भमिति भावः॥ न सूत्रान्तरवृत्तित्वं प्रकृतत्वमित्याह

प्रस्तुत इति। (कै)

पदान्तरेणाव्यवधानरूपाऽऽसक्तिरानुपूर्व्यम्। "विच्छिन्नाः" विभिन्नदेशस्थाः॥ भाष्ये

[2]यथेष्टं सम्बन्धः। (भा)

दृष्टवाक्यार्थबोधजनकत्वरूपः।

---

१ अ ७। पा ४। सू १५॥

२ आनुपूर्व्येण सन्निविष्टानां यथेष्टमभिसम्बन्धः प्रक्रयते कर्त्तुम्॥ नचैतान्यानुपूर्व्येण संनिविष्टानि॥ तथानुपूर्व्येणापि संनिविष्टानां यथेष्टमभिसम्बन्धो भवति। तद्यथा। अनड्वाहमुदहारि यां त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीरिति। तस्य यथेष्टमभिसम्बन्धो भवति उदहारि भगिनि या त्वं कुम्भं हरसि शिरसा अनड्वाहं साचीनमभिधावन्तमद्राक्षीरिति॥

असम्भवादिति। (कै)

चखतुः जग्मतुरित्यादौ सम्भवात् चिन्त्यमिदम्॥

पारिशेष्यादिति। (कै)

व्याख्यानाच्चेत्यपि बोध्यम्॥

एतावदिति। (कै)

पूर्वोक्तो नियमोऽपीत्यर्थः॥ ननु सूत्रस्यैकत्वात्तावन्मात्रविषये तादृशो वाक्यार्थो दुर्वच इत्यत आह

ग्रहणकवाक्यादिति॥ (कै)

[1]पाठक्रमादिति। (कै)

आर्थक्रमो नाम राजपुरप्रवेशन्यायेन स्वस्याकाङ्क्षितार्थान्वयक्रमः। एवं च कल्पितासन्नवाक्याद्बोधविषये तात्पर्यं नियामकमिति भावः। भाष्यात्तु आसत्त्यभावेऽपि पदार्थोपस्थितौ आकाङ्क्षावशाद्युत्पत्त्यनुसारेणान्वयबोध इति भावः॥ "साचौनम्" इत्यस्य तिर्य्यग्गच्छन्नमित्यर्थः॥ [2]"क्ङिलुग्" इति वार्त्तिके "क्वावि"त्यत्र विधावित्येतदध्याहृियते तेन क्ङिनिमित्तविधावित्यर्थः। आवृत्त्या क्वावित्यादेशेनापि संबध्यते। क्ङिनिमित्तादेश इत्यर्थः। तदेतदर्थतः पद्यते

[3]क्वौ लुप्तमिति। (भा)

इदं च क्वाचित्कमितिवच्च्यते। एवं लुप्ते आदेशे उपधात्व-

---

१ पाठक्रमादार्थक्रमो बलीयान् इति॥

२ क्ङिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपरुंख्यानम्। वा॥

३ क्वौ लुप्तं न स्थानिवत्॥

(न यदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजश्चर्विधिषु । १। १। ५८।)

प्रयुक्ते कार्य्ये चङ्परकृस्वे कुत्वे च स्थानिवत्त्वं नेत्यर्थः॥ भाष्ये [१]"क्नौ" इत्यस्य क्नौलुप्तमित्यर्थे उदाहरणं कण्डूरिति क्यजन्तात् क्विप्। अत्र यण् न यलोपश्च भवतीतिभावः॥ तत्रान्यं खण्डयति

यलोपेति ॥ (भा)

पिपठीरिति । (भा)

अलोपस्य स्थानिवत्त्वेन रेफान्तस्यापदत्वाद् दीर्घो न स्यादिति-भावः। अत्र रुत्वमप्येतदधीनमेव ॥

लावयेतेरिति । (भा)

ण्यन्तलूधातोरित्यर्थः ॥

ऊङ् नेति । (कै)

क्नौ वान्तस्याऽनङ्त्वादितिभावः। ऊठि "एत्येधती"ति वृद्धिः ॥

वर्णाश्रयत्वादिति । (कै)

[२]"अचः परस्मिन्" इति स्थानिवत्त्वं तु न वृद्धेरनादिष्टादचः पूर्वत्वाभावात् ॥

तच त्विति । (कै)

कारक इत्यादौ णिस्थानिकवृद्धिविषये स चरितार्थस्तथैव च [३]"आतो लोप" इति सूत्रे भाष्ये स व्याख्यात इति भावः॥ परे तु [४]"षत्वतुकोः" इति ज्ञापकाद् अनित्यत्वेनान्तरङ्गत्वमनाश्रित्य "क्नौ लुप्तम्" इति न कार्य्यं नित्यत्वाच्च पूर्वं णिलोपः। वृद्धिस्व-कृते णिलोपे उपदेशेन कृते त्वतिदेशेनेत्यनित्येतिपूर्वपक्ष्याशयमाऽऽः ॥

---

१ क्नौ किमुदाहरणम् ॥ २ अ १। पा १। सू ५७ ॥
३ अ ६। पा ४। सू ६४ ॥ ४ अ ६। पा १। सू ८६ ॥

(अ. १। पा. १। आ. ८) (न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घञ्चर्विधिषु। १। १। ५८।)

देवयतेरिति। (कै)

णिन्ताद्विवेरित्यर्थः॥ नन्वचोऽ कौविधिमित्येव सिद्धः। नचोकारस्य वृद्धिः स्याद् णेः स्थानिवत्त्वादिति वाच्यम्। ऊठ आदिष्टादवः पूर्वत्वादिति नेदमसाधारणमुदाहरणमिति चेन्न। सखीयतेः सख्युरिति "ख्यत्यात्" सूत्रभाष्योक्तं[1] णिन्तपदेः पात् पद् इति [2]"येन विधिः" इति सूत्रभाष्योक्तं "कण्डूतिः पिपठौः" इत्यादौ यणभावरुत्वयोः सिद्धिश्च तस्माऽसाधारणमुदाहरणं स्थानिद्वारकेऽनादिष्टादचः पूर्वत्वे तु इदमप्युदाहरणमिति बोध्यम्॥

नैवं विज्ञायते कौ लुप्तमिति (भा)

नैवमेव विज्ञायते किन्त्विदमपि क्वाचित्कं लक्ष्यसिद्धये आश्रयणीयमिति भावः॥

तदाश्रये इति। (कै)

[3]"वृक्षजातिः स्त्रियाम्" इति लिङ्गानुशासनाद् वृक्षे स्त्रीलिङ्गत्वं फले च नपुंसकत्वमिति भावः। वस्तुत आम्र इत्यादौ लिङ्गानुशासनस्य व्यभिचारादेतद् भाष्यप्रामाण्याच्च बिम्बवदरामलका वृक्षेऽपि चिलिङ्गा इत्याहुः॥

---

१ गोमत्यतेर्गोमानिति "उगिदचाम्" इति सूत्रभाष्योक्तम्। क। ग॥

२ अ १। पा १। सू ७२॥

३ "वृक्षजातिः" (लिङ्गानुशासन – सू)। स्त्रियामेव क्वचिदेवेदम्॥ "फलजातिः" फलजातिवाची शब्दो नपुंसकं स्यात् (लिङ्गानुशा–)॥

(न पदान्तद्विर्वचनवरेयलोपखरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजश्चर्विधिषु। १। १। ५८।)

किं तर्हीति। (कै)

यौगिकत्वे हि वृहसम्बन्धात्फले न पुनः फलसम्बन्धाद्वृत्वे इत्यत्र विनिगमनासंभवादिति भावः॥

विशिष्टेति। (कै)

विजातीयेत्यर्थः॥

अन्तरङ्गानपीति। (कै)

अस्य न्यायस्यान्तरङ्गनिमित्तविनाशकलुक एव तदन्तरङ्गबाधकताबोधकत्वे तु तत्परिभाषाप्रवृत्त्याभावसंपादकस्यानिवृत्तिनिषेधायेदमिति बोध्यम्॥

अव्यविकेति। (कै)

[1]"वोतो गुणे"ति ङीषो वैकल्पिकत्वादिति भावः॥

प्रतिपत्तिगौरवेति। (कै)

ज्ञानगौरवेत्यर्थः॥ ननु भसंज्ञकस्य न पुंवत्त्वं येन वर्णाश्रयतया भत्वाभावेन पुंवत्त्वं न स्यात् किं तु तत्प्रत्ययविषये पूर्वमेव पुंवत्त्वप्रतिपत्तिरत आह

यद्यपीति॥ (कै)

इह तु लुकीति। (कै)

अनेन [2]"न लुमते"ति निषेधान्न प्रत्ययलक्षणम्। किं च ढभिन्नतद्धितविषयाभावादपि न तत्प्रवृत्तिरित्यपि ध्वनितम्। किं

---

१ अ ४। पा १। सू ४४॥ २ अ १। पा १। सू ६३॥

(अ. १। पा. १। आ. ८) (न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। १। १। ५८।)

चान्तरङ्गानपीति न्यायेन एकादेशात् पूर्वमेव लुकि [1]प्रत्ययलक्षणसत्त्वे यजादित्वाभावान्न भवम्। न च वर्णप्राधान्याभावात् कथं वर्णाश्रये नास्तीत्युक्तिर्भगवत इति वाच्यम्। प्रत्ययलक्षणसूत्रस्य नियमार्थत्वमिति पक्षेऽदोषात्॥ [2]"न लुमताङ्गस्य" इति यथाश्रुतेऽभ्युपेत्याऽपि [3]"ठक्छसोश्चे"ति पुंवत्त्वं भाष्ये आह

न खल्वपीति॥ (भा)

नन्वानुग् न ङीषीत्युच्यते येन स्थानिवत्त्वेन तदापत्तिरत आह

संनियुक्त इति। (कै)

एवं च संनियोगशिष्टपरिभाषाप्राप्ताऽऽनुग्निवृत्तिप्रतिबन्धद्वारा आनुग्रक्षणमेव पूर्वविधिरिति भावः। अत एवैनेय इत्यादौ [4]"यस्येति" लोपे नस्य श्रवणम्। अत एव [5]"अचः परस्मिन्" इति सूत्रे विधिशब्दस्य भावसाधनत्वे पूर्वस्य विधानं प्रतिपूर्वस्य भावं प्रतिपूर्वः स्यादिति स्थानवदित्यर्थ उक्तः॥

पूर्वः स्याद् (कै)

इत्यस्य पूर्वः स्थितः स्यादित्यप्यर्थो बोध्यः। एवं च पूर्वसूत्रे तन्त्रेणोभयसाधनविधिशब्दघटितग्रहणम्। यत्तु कैयटादिभिः संनियोग-

---

१ "प्रत्ययलक्षणसत्त्वेऽपि" इत्यधिकम्। ग-पुस्तके॥

२ अ १। पा १। सू ६३॥

३ वा- अ ६। पा ३। सू ३५॥

४ अ ६। पा ४। सू १४८॥

५ अ १। पा १। सू ५७॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घञस्विर्विधिषु । १। १। ५८ ।)

शिष्टपरिभाषाऽनित्यत्वेनेदं साधितं तदृधेव ॥ नन्वत्रापि [१]'भस्याढे" इति पुंवत्त्वं स्यादत आह

समानायामिति । (कै)

पुंसि इन्द्रत्वादिप्रवृत्तिनिमित्तं स्त्रियान्तु तत्सम्बन्ध इति भावः ॥ नन्वेवम् अग्नायौ देवताऽस्याग्नेयं हविरिति उदाहरणासिद्धिस्तस्मादारोपितेन्द्रत्वाद्येव स्त्रियामपि प्रवृत्तिनिमित्तमित्यत आह

वर्णाश्रयत्वादिति । (कै)

अणो लुकि [२]"न लुमते"ति निषेधाद् ढभिन्नतद्धितविषयाभावाच्चेत्यपि बोध्यम् ॥

अथवेति । (कै)

ङीलुकः स्थानिवत्त्वेन भवादीकारपरत्वाच्चेति भावः ॥

श्नब् लुकीति । (कै)

अन्यथा श्नब् लुकः स्थानिवत्त्वेन व्यवधानात् प्राप्तिरेव नेतिभावः । [३]श्नब् लुकः [४]परनिमित्तत्वाभावादेव न स्थानिवत्त्वप्रसक्तिः । अत एव जुहुत इत्यादौ श्नोः स्थानिवत्त्वान्न गुणः ॥ भाष्ये

योऽसौ णाविति । (कै)

"णेर्णिच्युपसंख्यानम्" इति सिद्धमेतत् । वस्तुभेदान्न दोष इति

---

१ भस्याढे तद्धिते । वा । तसिलादिष्वाकृत्वसुचः (६ । ३ । ३५) इति सूत्रस्थवार्त्तिकम् ॥

२ अ १ । पा १ । सू ६२ ॥ ३ वस्तुतः । क । ग ॥

४ परनिमित्तकत्वाभावात् – । ग ॥

(अ. १। पा. १। आ. ८) (न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । १। १। ५८।)

तत्त्वम् । अत एव ज्ञापकात् प्रायोगिकमच्स्थानिकादेशत्वमेव "अचः परस्मिन्" इत्येतत् प्रवृत्त्युपयोगीति बोध्यम् ॥

प्रत्ययविधाविति । (भा)

अत एव चङ्परङ्हस्वे निषेधः सार्थकः ॥ ननूपधात्वे स्थानिवत्त्वनिषेधेऽपि ञ्णित्परत्वांग्ये णिपरत्वांग्ये च तस्य दुर्वारत्वेन न पटयतीत्यादौ वृद्धिर्नाऽपि ह्रस्वे निषेधो व्यर्थ इति चेन्न । प्रत्ययस्याङ्गांग्ये उत्थिताकाङ्क्षत्वेन ञ्णिति णावित्यादेरङ्गविशेषणत्वस्यैवौचित्यात् । उपधात्वप्रयुक्तकार्य्ये एव तन्निषेधेन णित्परत्वाद्यंग्येऽपि स्थानिवत्त्वनिषेधाच्च ॥

अर्क इति । (भा)

कर्मणि घञ् [1]"चजोः" इति कुत्वमिति भावः ॥

नैतद् घञन्तमिति । (भा)

एरच् प्रसङ्गादित्यर्थः ॥

एतदपीति । (भा)

एवं च कुत्व इत्यावश्यकमिति भावः ॥ वस्तुतस्तदनावश्यकमित्याह

पूर्वत्रासिद्धे इति । (भा)

"अचः परस्मिन्" इत्येतदृष्ट्या चिपाद्या असिद्धत्वेन न्यायसिद्धानुवादोऽयं तत्फलन्तु अतिदेशान्तराणां वतिघटितानामन्ता-

---

१ अ ७। पा ३। सू ५२ ॥

(न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु- (अ. १। पा. १। आ. ८)
स्वारदीर्घजश्चर्विधिषु। १। १। ५८।)

दिवदित्यादीनां चिपाद्यां प्रवृत्तिबोधनम्। तेनामी चौरपेण इत्यादौ तत्सिद्धिरितिदिक्॥

अदुग्धेति। (भा)

कस्यान्तलोपे १"झलो झली"ति सलोपे तदीयाऽलोपस्य स्थानिवत्त्वं न॥

चतुर्थत्वे इति। (भा)

भष्भावे इत्यर्थः॥

चकार इति। (भा)

मुध्वोरित्यनुकर्षणार्थ इत्यर्थः॥

पूर्वेणैवेति। (कै)

२"एकाचो वश" इत्यनेनेत्यर्थः॥ ननु संयोगान्तलोपप्रभृतिषु इत्युक्त्वा तं विहाय कुत्वाद्युदाहरणदाने बीजाभावोऽत आह

संयोगान्तेति॥ (कै)

पदान्तेति। (कै)

चिन्त्यमेतत्। पदचरमावयव एव तन्निषेधात्। परपदस्थाजादेशस्यैव तेन स्थानिवत्त्वनिषेधाच्चेति॥ तदुदाहरणानि दर्शयति

स्कन्दयतेरित्यादिना॥ (कै)

काष्ठतगिति। (कै)

न च काष्ठशगेव नास्ति कुतः "काष्ठशक्स्थाते"ति ३"परश्च"

---

१ अ ८। पा २। सू २६॥ २ अ ८। पा २। सू ३७॥
३ अ ३। पा १। सू २॥

इति सूत्रस्थभाष्याद् एषामनभिधानमिति वाच्यम्। यत्र संयोगादिलोपप्रसक्तिस्तद्विषयत्वेनाऽनभिधानस्यादोषात्॥ नन्वत्र संयोगादिलोपः प्राप्नोति न च तत्र पदान्तविधित्वमिति न तेन सिद्धिरत आह

संयोगादिलोपेति । (कै)

केचित्तु एतद्भाष्यप्रामाण्यादेषां प्रयोगाणामनभिधानमेवेत्याहुः॥ भाष्ये

वरेयलोपस्वरवर्जमिति । (भा)

सवर्णानुस्वारदीर्घादयः साहचर्य्यात् चैपादिका एव गृह्यन्ते इति भावः॥ नन्वेवं यङन्ताण्णिजन्तप्रकृतिकण्यन्ताद्वा चिणि अग्रंग्रामि अग्रामीत्यादौ दीर्घो न स्यात् णिलोपाल्लोपयोः स्थानिवत्त्वादितिचेन्न॥ "णेर्णिच्युपसंख्यानाद्" अग्रामीत्यस्य सिद्धेः। अग्रंग्रामीति यङ्लुगन्ताद् णिचि भविष्यति । न हि यङ् यङ् लुकोः स्वरे रूपे वा विशेषः॥ ग्राहितम् इत्यादौ विहितविशेषणाश्रयणान्न दीर्घ इति दिक्॥ अन्ये तु तृतीयषष्ठाध्यायस्थभाष्यप्रामाण्यादन्यदीर्घमप्युपलक्षयन्ति । एतच्च तत्रैव निरूपयिष्यामः॥ भाष्ये

काक्यर्थमिति । (भा)

न च [१]"स्कोः" इति सूत्रे झल्ग्रहणापकर्षेण झलन्तसंयोगस्यैव ग्रहणात्प्रकृते न दोष इति वाच्यम्। झलो लोपः [२]"संयोगान्तलोपः" इत्याष्टमिकभाष्येण संयोगादिलोपे तदसम्बन्धबोधनात्। चिपाद्यां बहिरङ्गासिद्धत्वाप्रवृत्तेश्चेतिभाष्याभिप्रायः।

---

१ अ ८। पा २। सू २९॥ २ अ ८। पा २। सू २३॥

निगाल्यत इति ॥ (भा)

नन्वचान्तरङ्गत्वादेव लत्वं सिध्यति इति वाच्यम् । सपादसप्ताध्यायीस्थकार्य्यप्रवृत्तियोग्यतया तदप्रवृत्तेः । चिपाद्यां तत्परिभाषाऽप्रवृत्तेश्च । न च प्रत्ययलक्षणम् । अस्विधिलात् । [1]प्रत्ययलक्षणसूत्रस्य नियमार्थतायां एव भाष्यसंमतत्वात् ॥ ननु स्थानिवत्त्वनिषेधेऽपि मांषशब्दस्य वपनीशब्देन समासे समासान्तो नकारो नेति णत्वं न स्यादत आह

ङीबुत्पत्तेरिति । (कै)

गतिकारकोपपदानां कृद्भिरितिवचनादिति भावः । न च बहिरङ्गासिद्धत्वेनेदं सिद्धम् । चिपाद्यां तदप्रवृत्तेरिति दिक् ॥

द्विर्वचनेऽचि । १ । १ । ५९ ॥

अथाऽपीति । (कै)

प्रौढ़िवादोऽयम् । तत्पक्षस्याश्रितत्वात् । [2]"न पदान्त" सूत्रे आष्टमिकद्वित्वस्यैव ग्रहणाच्च ॥

यणयुक्तस्यैवेति । (कै)

यद्यपि स्थानिवत्त्वे द्विर्वचनं नित्यं तथापि यणपि नित्य इति परत्वात् स स्यादिति भावः । इदमेवाभिप्रेत्य भाष्ये

---

१ अ १ । पा १ । सू ६२ ॥ २ अ १ । पा १ । सू ५८ ॥

[1]अभ्यासरूपं न सिध्यतीति (भा)

एतावदेवोक्तं न तु निन्यतुरित्यादावियङ उत्तरखण्डे अवर्णं स्यादित्यापादितं तस्यानित्यत्वेन ततः पूर्वं द्वित्वस्यैव प्रवृत्तेरिति ॥ दुर्लक्ष्योऽपि विशेषः सूक्ष्मदृशं प्रतिदुर्वारोऽत आह

छान्दसश्चैवेति । (कै)

एवं च "दाति प्रियाणी"तिवद्द्वित्वाभाव इति भावः । अचोपधालोपस्य छान्दसत्वं वदता क्रमो लौकिकत्वमभ्युपेतम् ॥ ननु सिद्धान्ते द्वित्वनिमित्तेऽचीत्यर्थस्तदाऽचीतिकिमर्थम् । अरिरिषतीत्यादिसिद्धये कार्यमनुभवतः कार्यिणो निमित्तत्वानाश्रयणेनापि "नटभार्य्यावद्व्यञ्जनानी"ति षाष्ठभाष्यरीत्या द्वितीयाजवधिकस्य घ्नीय् इत्यस्यैव द्वित्वप्राप्त्या यङः कार्यित्वेन द्वित्वनिमित्तत्वाभावात्कथं तन्निमित्तादेशे स्थानिवत्त्वप्रसक्तिरिति चेन्न । द्वितीयहल्पर्यन्तस्यैव द्वित्वमितिमते तत्सत्त्वात् । अत एव प्रातिशाख्ये उक्तं "स्वरान्तरे व्यञ्जनान्तरस्येति" । "अरिरिषती"त्यादौ रि इत्यस्य द्वित्वेऽपि इकारस्य सनवयवतया सनो द्वित्वानुभवेन तन्निमित्तत्वाभावादिति दिक् ॥ षाष्ठभाष्यरीत्या लधिजगे इति व्यावर्त्यं बोध्यम् ॥ ननु लिटि विधीयमानस्य गाङः कथमच्यादेशत्वमत आह

[2]कृते इति ॥ (कै)

---

१ कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपं न सिध्यति । भा ॥

२ "अधिजगे" इति कृते एग्यादेशे गाङितिप्रक्रियाश्रयेण चोद्यम् । ङकारस्यानुबन्धत्वादिकारस्य गाङ् भवत्यजादेशः ॥

ङकारस्येति। (कै)

प्रकृतसूत्रे प्रयोगे निवर्त्यस्यैव स्थानित्वेन ग्रहणम् "अचः पर-स्मिन्" इति वदिति भावः।

द्विलकारक इति (भा)

भाष्ये। एवं चाचि नाऽयमितिभावः। एवं च इदमज्ग्रहणव्या-वर्त्यमिति स्पष्टमेवोक्तमिति बोध्यम्। न च सिद्धान्ते "आर्द्धधातुके" "लिटी"त्यादीनां तच्च विषयसप्तमीत्वेनानैमित्तिकत्वान्न तच्च दोष इति वाच्यम्। विषयसप्तमीत्वेऽपि बुद्धिकृतनिमित्तत्वस्य दुर्वारत्वेन सनै-मित्तकत्वमस्त्येवेति भाष्याशयात्। अच पंच पचाः। अचि योऽजादेशः स द्विले कार्य्ये स्थानिवदित्येकः॥ अजादौ प्रत्यये योऽजादेशः स द्विले स्थानिवदिति द्वितीयः॥ द्विर्वचनशब्दस्याधिकरणल्युडन्तत्वाद् अग्र आद्यजन्तत्वाद्वा द्विलनिमित्तेऽचीत्यादीतिद्वतीयः॥ द्विलनि-मित्तेऽचि आदेशनिषेध इति चतुर्थः॥ द्विलनिमित्तेऽचि योऽजा-देशः स स्थानिवद् न भवति वा द्विले कार्य्ये इतिपंचमः॥ तत्रा-ऽऽद्ये दोषोऽङ्गावनमित्याह

अचीति॥ (कै)

"क्ङितः" [1]"उपधायाश्च" इतीत्वं तस्य च णिनिमित्ततया-ऽच्यादेशता। अङ्गाच्चिते प्रत्यये तद्विधानात्॥ ननु आत्वं कथमच्या-देशोऽनैमित्तिकत्वादत आह

शित्सदृश इति। (कै)

---

१ अ ७। पा १। सू १०१॥

Nyayabindutīkā, (Text)	Rs. 0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-3 @ /6/ each	3	6
Padumawati Fasc. 1-3 @ 2/	6	0
Pariçista Parvan. (Text) Fasc. 1-5 @ /6/ each	1	14
Prākṛita-Paingalam, Fasc. 1-2 @ /6/ each	0	12
Prithivirāj Rāsa, (Text) Part II. Fasc. 1-5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9. Vol. II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-10 @ /6/ each	13	14
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/	0	12
Tul'si Sat'sai. (Text) Fasc. 1-5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-3 @ /6/ each ...	1	2
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each	5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each	4	
Viṣnu Smṛti, (Text) Fasc. 1-2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1-6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1-6	2	4

Tibetan Series.

Pag-Sam Thi S'iñ. Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5, @ 1/ each	13	0
Rtogs *brjod dpag bkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1-2 @ /12/	1	8
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	37	0
Ditto English Fasc, 1-5 @ 1/ each	5	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1 each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	0
Maāṣir-ul-Umarā, Vol. I. Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1-5 @ /6/ each.	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...	...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...	...	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ...	...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	...	0	6
Niẓāmī's Khiradnāmah-i-Iskandarī, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	...	1	14
*Suyūty's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each	...	4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each ...	...	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	...	10	8
Ditto Index	...	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	...	3	0
Wis o Rāmīn. (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each	..	6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	...	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	...	50 0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmiu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein Ph.D., Jl Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c.. must be made payable to the "Treasurer, Asiatic Society," only.

24-10-1900.

Books are supplied by V-P.P.

PK
531
A15
1899
v.1
pt.7

Pātañjali
Mahābhāsyapradīpodyotah



PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY